श्रीहरिः ।

दशदिगन्तविजयिगोस्वामिश्रीमत्पुरुषोत्तम-
चरणविरचितव्याख्यासमलंकृता

माण्डूक्योपनिषत् ।



॥ श्रीहरिः ॥

माण्डूक्योपनिषत् ।

सगौडपादकारिका

सव्याख्या च

सा च

गोस्वामिकुलकौस्तुभश्रीश्रीगोकुलनाथमहाराज-
चरणानामाज्ञानुवर्तिना भट्ट-
श्रीरमानाथशास्त्रिणा

संस्कृत्य

तदाज्ञया

पुष्टिमार्गकार्यालयात्प्रकाशिता

वैक्रमः १९८०   वाल्लभः ४४५

Published by Pandit Ramanath Shastri, Third Bhoiwada, Badamandir, Bhuleshwar, Bombay.

Printed by Ramchandra Yesu Shedge at the "Nirnaya-sagar" Press, 23, Kolbhat Lane, Bombay.

वाङ्मुखम् ।

प्रियवाचकमहाभागाः ! सेयं माण्डूक्योपनिषत् श्रीमत्पुरुषोत्तमचरणव्याख्याभूषिता भवत्करकमलयोरर्प्यते । यत्रालययन्त्रणादेषाऽल्पतराऽपि चिराय निष्क्रान्तेति कष्टम् । एतया सह वैतथ्यप्रकरणं नाम शंकराचार्याचार्य्यगौडपादकारिका अपि निविष्टाः । नैता उपनिषत् । किंच विशेषतो मायावादनिरूपणपरा एवैताः । अतएव केनचन स्वाचार्यभक्तिविह्वलेन श्लोकानपि वेदेऽभिनिवेशयितुमिच्छतैता अस्यामुपनिषदि संयोजिता इति मे मनीषा । मन्ये वेदार्थमेतदुपनिषदर्थं च निपुणं विलोकयताऽपरेणापि विदुषा नायमर्थो न स्वीक्रियेत ।

श्रीमत्पुरुषोत्तमचरणैरपि 'भवन्मतमूलगुरोः कारिकास्वपि मायावादो न लभ्यते, लभ्यते तु ब्रह्मवाद' इति दर्शयद्भिःस्वपाण्डित्येन विवृताः । पाण्डित्यं चात्रैतेषां प्रतिपदमपाणिविहितं साम्प्रदायिकविदुषाम् ।

एतदुपनिषत्पुस्तकं वैतथ्यप्रकरणपुस्तकं चास्माभिस्तेलीवालामूलचन्द्रसुधीसकाशाल्लब्धम् । तच्च नातिशुद्धमासीदेकं तु विसंधिप्रारब्धसंस्कृतशिक्षलिखितामिवासीत् । प्रतिफलकाभावाद्यथायथं शोधितमप्येतदवशिष्टाशुद्धिस्यात्तदमत्सरा विद्वांसः स्वयं संशोध्य वाचयन्त्विति प्रार्थना । संप्रदायग्रन्थसंशोधनप्रकाशनपरमोत्साहः सुधीः सोयं तेलीवालामहाशयः पुस्तकप्रदानेन सर्वानपि मुद्रापणचिकीर्षूननुगृह्णातीति तस्मै धन्यवादा[illegible]ह्मः ।

संस्कर्ता.

[illegible] चद [illegible]

श्रीकृष्णाय नमः ।

गोस्वामिश्रीमत्पुरुषोत्तमविरचितदीपिकासहिता

माण्डूक्योपनिषत् ।

नत्वा श्रीवल्लभाचार्यचरणौ पुरुषोत्तमः ।
माण्डूक्यं तत्कृपादृष्टिबलेन व्याकरोति हि ॥ १ ॥

हरि ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं ।
भूतं भवद्भविष्यदिति सर्वमोङ्कार एव ।
यच्चान्यत्त्रिकालातीतं तदप्योंकार एव ॥ १ ॥

सर्वस्य वेदस्य ब्रह्मवाचकत्वे बीजमुपदिशन्ती श्रुतिरोङ्कारार्थकथनमुखेन तदाह । कथमिदमवगम्यते ? उच्यते । 'प्रणवश्चतुर्द्धा व्यवस्थित इति' 'वेददेवयोनि' रित्यथर्वशिखायां श्रवणात्तदवयवानामकारादीनामृग्वेदादिरूपताश्रवणाच्च । ॐकारमुपक्रम्य 'स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । स सर्वमन्त्रोपनिषद्वेदबीजं सनातन'मिति द्वादशस्कन्धवाक्यादहमित्युपक्रम्य 'प्रणवः सर्ववेदेष्वि'ति गीतावाक्याच्च सर्वोपनिषद्वेदबीजरूपस्य प्रणवस्य ब्रह्मवाचकत्वसिद्धौ प्रणवशक्तेरेव तत्कार्ये वेदे प्रसरणाद्वेदस्यापि ब्रह्माभिधायकत्वम् ।

'सर्वे वेदा यत्पदमामनन्ती'ति श्रुतौ दर्शितम् । 'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् । एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदा'मित्येकादशस्कन्धे च भगवतोक्तम् । अतो जानीहि । केचित्तु 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' 'ओमित्यात्मानं युञ्जीत' 'ओमिति ब्रह्म' 'ओंकार एवेदं सर्वमि'त्यादिश्रुतिभिः ओंकारस्य सर्वालम्बनत्वमुक्त्वाऽऽत्माभिधायकत्वादात्मस्वरूपतां च तस्योक्त्वाऽद्वयस्य परमार्थस्य सत आत्मनो रज्जुसर्पदृष्टान्तेन प्राणादिसर्वविकल्पास्पदत्वमङ्गीकृत्य प्राणाद्यात्मविषयवाक्प्रपञ्चस्यापि तद्दृष्टान्तेनोङ्कारत्वं चाङ्गीकृत्य 'वाचारम्भणं विकारो नामधेयं' 'तस्येदं वाचा तन्त्या नामभिर्दामभिः सर्वं सितं' 'सर्वं हीदं नामनी'त्यादि श्रुतिभ्य ओंकारविकारशब्दाभिधेयस्य सर्वस्य प्राणादेरभिधानाव्यतिरेकाद्वाङ्मात्रत्वं दर्शयन्ति । तत्रोङ्कारस्याऽऽत्मरूपतापर्यन्तमादरणीयं शेषं त्वनादरणीयम् । प्राणादीनां विकल्पमात्रत्वाभावात् । मृत्पिण्डादिदृष्टान्तानुरोधेन[1] कार्यजातस्य सदनन्यतायाः[2] श्रौतत्वात् । वाचारम्भणश्रुतेर्विकारस्य वाङ्मात्रतां बोधयन्त्या ब्रह्मात्मताबोधनपरत्वात् । अन्यथा शुक्तिरजतादेरेव दृष्टान्तता कथिता

---

१ रोधे इतिख पाठः । २ तायामिति कपाठः ।

स्यात् । न चाऽऽकारस्य कल्पितत्वं शक्यवचनं सत्कार्यवादश्रवणादुत्पत्तेरभिव्यक्तिमात्रत्वस्य श्रुत्यभिप्रेतत्वात् । अभिव्यक्ते[1]चापरे तत्तन्नाम[2]मनियमनात् । व्याकरणश्रुत्या तथा निश्चयात् । सर्वत्रेच्छाया एव कारणत्वकथनाद्वाचोतन्त्येति बन्धनश्रुतेरपि तथैव साङ्गत्यात् । 'सर्वं हीदं नामनी'त्यस्या अपि मेख्यां बलीवर्दा इतिवद्बन्धनविषयत्वादेवोपपत्तेरिति ।

ननु प्रणवस्य सबीजसदात्मवाचकत्वं भवतु नाम न तु परवाचकत्वमपि । 'यतो वाचो निवर्तन्त' इत्यादिश्रुतिविरोधादिति चेत् । न । तासामैदमिथ्येन वदनाशक्तिपरत्वात् । अन्यथा 'तन्त्वौपनिषद' मित्यादिविरोधात् । श्रुतित्वादेवैकतरबाधस्याशक्यत्वात् । न चोभयसामञ्जस्यार्थमपरस्य वाच्यत्वं परस्यावाच्यत्वमिति व्यवस्थाप्यमिति वाच्यम् । 'एतद्वै सत्यकामे'त्यादिविरोधात् । न च तत्रैक्यमेव विधीयते नतु वाच्यवाचकभाव इति वाच्यम् । तथा सत्योङ्कारपर्यायवाच्यताया अनिवृत्तेः । वस्तुतस्तूपासनार्थमेवैक्यविधानम् । ज्योतिश्चरणाधिकरणेन तथा निश्चयात् । ब्रह्मणः सर्वात्मकत्वेनोङ्कारे कल्पनोपदेशस्याविरुद्धत्वाच्च । अत ऐक्येऽपि वाच्यवाचकभावो निष्प्रत्यूह एव । यत्तु वाच्यवाचक-

---

१ चाकर इत्ति कपाठः । २ तत्रेति कपाठः ।

योर्युगपत्प्रविलापने तद्विलक्षणब्रह्मप्रतिपत्तिरैक्यकथन-प्रयोजनं 'पादामात्रा मात्राश्च पादा' इति वक्ष्यमाणत्वादित्युक्तम्। तन्न। पादामात्रा इत्यस्य प्रणवे ब्रह्मवाचकताबोधनपरत्वात्। तदुपपादयिष्यते। अतो वेदस्य ब्रह्मवाचकत्वे यद्वीजं तदुपदेशार्थमेव प्रणवार्थकथनं तत्र तत्र श्रुतिषु। तदेतदभिसन्धायैवाऽऽह—ओमित्येतत्। अयमोङ्कारः अक्षरं अक्षरब्रह्मात्मकः। तत्प्रत्यासन्नत्वेन तद्वाचकत्वात्। तदिदमुपसंहारे स्फुटिष्यति। इदं सर्वं तस्योपव्याख्यानं इदं सर्वमोङ्कारयोनिकं वाङ्मयम्। तस्योङ्कारस्य। उपव्याख्यानं निकटतया विवरणमित्यर्थः। कुत इति चेत्। तत्राऽऽह—भूतं भवदित्यादि। भूतमतीतं, भवत् वर्तमानं, भविष्यद्भावि, इति कालत्रयपरिच्छेद्यं सर्वं कार्यजातमोङ्कार एव। यच्चान्यत्कार्यातिरिक्तं त्रिकालातीतं कालत्रयापरिच्छेद्यं जीवप्रकृत्यादि, तदप्योङ्कार एव अक्षर एव। अत ओङ्कारवाच्यस्य वाचकं सर्वं वाङ्मयमोङ्कारविवरणरूपमित्यर्थः। तथा चोङ्कारे निर्णीते सर्वस्यापि निर्णयसिद्धेस्तन्निर्णय आवश्यक इति भावः।

एवं प्रतिज्ञां सूचयित्वा ओङ्काराभिधेयत्वाय सर्वस्य स्वरूपमाह—सर्वं ह्येतद्ब्रह्मेति।

सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्[१]

हि यस्माद्धेतोः एतत् पूर्वोक्तं सर्वं कार्यमकार्यं च ब्रह्म। नतु तदतिरिक्तमित्यर्थः। स्वरूपमुक्त्वा साङ्ख्य-दर्शनजं संशयं वारयति—'अयमात्मा ब्रह्मे'ति। अयं सर्वरूपतया च ब्रह्मपदेनोङ्कारेण चास्माभिरुच्यमानः, आत्मा ब्रह्म, ब्रह्मपदवाच्यो नतु प्रकृतितत्वमित्यर्थः। एतेनैव केवलप्रत्यगात्मवाचकतापि निरस्ता बोध्या। आत्मशब्दस्य पुरुषतत्वे जीवादौ च प्रसिद्धत्वात्तद्वार-णाय विवक्षितस्य स्वरूपमाह—'सोऽयमात्मे'त्यादिना। 'स आत्मा स विज्ञेय' इत्यन्तेन। इदं सर्वं वक्ष्यमाणं च, सूत्ररूपेण पूर्वमुक्तस्य वृत्तिरूपं ज्ञेयम्। तत्र पूर्वं दुर्ज्ञेयतां तस्य जानन् बोधनाय पादशो विभजते—'सोऽयमात्मा चतुष्पादि'ति। कार्षापणादेरिवांशवचनः पादशब्दो नतु गवादेरिव चरणवचनः। तत्रापि ब्रह्मगमकत्वात्करण-साधनः सर्वत्र, नतु विश्वादिषु करणसाधनस्तुरीये कर्म-साधनः। वैरूप्यात् ब्रह्मणोऽनिर्वाच्यतापत्तेश्च। न च तुरीयस्याव्यहार्यत्वादिकथनान्न दोष इति वाच्यम्। तेनैव रूपेण निर्वाच्यतायाः सुवचत्वात्। न चैवं परेऽपि ब्रह्मणि तदापत्त्याऽनिरुक्तश्रुतिविरोधापात इति शङ्क्यम्। शङ्कानां मनोगोचरतानन्तरकालीनत्वेन ब्रह्म-

---

१ पातेति क्वचिन्नास्ति।

णश्चावाङ्मनसगोचरत्वेनानवसरपराहतत्वात् । 'नायमात्मे'ति श्रुत्या श्रुतीनामपि दूरत एव ज्ञापकत्वात् । उपायानां च यत्नमात्र एव पर्यवसन्नत्वात्परमात्मप्रकाशस्य तदेकतन्त्रत्वात् । अतो न चोद्यावकाश इति सर्वत्रात्र करणसाधन एव पादशब्द इति दिक् ।

के ते चत्वारः पादा इत्याकाङ्क्षायां तान् वदन् प्रथममाह—जागरितेत्यादिना ।

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ ३ ॥

जागरितं सात्विकोऽन्तःकरणवृत्तिविशेषः स्थानं यस्य स जागरितस्थानः । बहिर्लौकिके बाह्ये विषये प्रज्ञा अवभासो येन जीवानां स बहिःप्रज्ञः । अथो लोकान्भूर्लोकेऽन्तर्भाव्य भूरादिव्याहृत्युक्ताः लोकाः सप्ताङ्गानि यस्यासौ सप्ताङ्गः । दशेन्द्रियाणि पञ्च प्राणाश्चत्वार्यन्तःकरणानि चेत्येवमेकोनविंशतिर्मुखान्युपलब्धिद्वाराणि यस्यासावेकोनविंशतिमुखः । यद्यपि प्राणानामुपलब्धिद्वारत्वं न प्रसिद्धं तथापि कर्मेन्द्रियाणां भोग्यसम्पादकत्वेनैवं प्राणानां करणानुग्राहकत्वेन परम्परया द्वारत्वमविरुद्धम् । उक्तैर्द्वारैः स्थूलं ब्रह्माण्डशरीरं स्थूलान् शब्दादीन् विषयान्वा भुङ्क्ते सर्वधीवृत्तिभिरनुभ-

१. नेवेति कपाठः ।

वतीति स्थूलभुक् । विश्वान्सर्वान्तरान् जीवाननेकधा तत्तदुचितलोकेषु भोगेषु च नयतीति विश्वानरः । स एव वैश्वानरः सर्वपिण्डात्मा । स्वार्थेऽण् । यद्यपि वैश्वानरोपासनास्थो वैश्वानरशब्दो वैश्वानराधिकरणे परब्रह्मवाचकत्वेन व्यवस्थापितस्तथापि प्रकृते विश्वत्वेनापरब्रह्मताया विवक्षितत्वाद्विराड्वाचक एव ज्ञेयः । अत एव चौदर्याग्निव्युदासः ।

यत्तु 'मूर्द्धैव सुतेजा' इत्याद्युपन्यस्य कैश्चित्सप्ताङ्गत्वमुक्तं, तन्न । उर आदित्यागापत्तेः । तत्र हि 'तस्य ह वा एतस्याऽऽत्मनो वैश्वानरस्य मूर्द्धैव सुतेजा' इत्यादिना पादान्तानि षडङ्गान्युक्त्वा 'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय' इत्येकादशाङ्गपाठात् । अग्निहोत्रकल्पनाशेषत्वेन तदनादरण आस्यस्यापि त्याज्यत्वापत्त्या सप्तसङ्ख्यापूर्त्यभावप्रसङ्गस्य दुर्वारत्वात् । अत उक्तान्येव सप्ताङ्गानीति निश्चयः । तादृशः स प्रथमः पादः । 'पादोऽस्य विश्वाभूतानी'ति श्रुतेः । पद्यते ज्ञायते परं ब्रह्मानेनेति पादः । उत्तरपादाधिगमस्यैतत्पूर्वकत्वादस्येतरप्राथम्यम् ।

यच्चोक्तं सर्वस्य प्रपञ्चस्य प्रत्यगात्मना चतुष्पादत्वमत्र विवक्षितम् । अतः सर्वप्रपञ्चोपशमेऽद्वैतसिद्धिरिति । तदपि न । अयमात्मा ब्रह्मेति सूत्रस्थात्मपदस्य

प्रकृतितत्त्वव्युदासार्थमुक्तत्वात् । 'सोऽयमात्मे'त्यत्रापि तस्यैव ब्रह्मणो विवक्षितत्वेन प्रतीचोऽत्र विवक्षाभावात् । विकल्पबुद्ध्यपायमात्रेणाद्वैतसिद्धेश्चेति न किञ्चिदेतत् । नृसिंहोत्तरतापनीये प्रतीचोऽजया चतुष्पात्त्वस्य ब्रह्मणो वास्तवतथात्वस्य स्फुटत्वेन तद्विरोधाच्च ।

द्वितीयमाह—स्वप्नस्थान इति ।

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशति-
मुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥४॥

स्वप्नो राजसोऽन्तःकरणवृत्तिविशेषः स्थानमस्येति स्वप्नस्थानः । अन्तः आन्तरे विषये 'अस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयंविहत्य स्वयंनिर्मायेति' श्रुत्युक्ते माया-प्रेरितमनोवृत्तिरूपे स्वाप्ने मनोरथिकाभिमानिकादौ च प्रज्ञाऽनुभवो येनेत्यन्तःप्रज्ञः । न च स्वप्नो नानुभव इति वाच्यम् । 'पाप्मन आनन्दांश्च पश्यति । स्वप्ने महिमानमनुभवती'त्यादिश्रुतिविरोधात् । स्वप्नो दृष्ट इत्येवमनुभवानुवादविरोधाच्च । स्वाप्नप्रज्ञा चातिरि-क्तापि, न तु वासनारूपैव । अदृष्टाश्रुतादेरपि दर्श-नात् । दृष्टं चादृष्टं च श्रुतं चेत्याद्युक्त्वाऽग्रे पश्यतीत्याथ-र्वणे श्रावणाच्च । न चादृष्टमित्यादेरिह जन्मन्यदृष्टमि-त्येवमादिरर्थः । सम्यङ्मानाभावात् । वासनायाः सिद्धत्वेन निर्माणश्रुतिव्याकोपापातात् । न चोद्बोधन-

मादाय श्रुतिः समर्थयितुं शक्या । निमित्तमन्तरेणोद्बोधकस्य तत्राशक्यवचनत्वात् । न चादृष्टेनोद्बोधसिद्धिः । तस्य द्वारसापेक्षत्वादिति दिक् ।

सप्ताङ्गत्वादिकं तु तैजसस्य हिरण्यगर्भत्वादविरुद्धम् । 'तैजसो हिरण्यगर्भो द्वितीयः पाद' इति नृसिंहतापनीयश्रुतेः । प्रविविक्तमिन्द्रियापेक्षया आन्तरं भुङ्क्त इति प्रविविक्तभुक् । तैजसानां प्रकाशकानामिन्द्रियाणामनुग्राहकत्वात्तैजसः स द्वितीयः पादः । ज्ञापकोंऽशः ।

तृतीयमाह–

यत्र सुप्तो न कंचन कामं कामयते । न कंचन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ५

यत्रेत्यादि । 'जाग्रत्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथे'ति स्मृत्या स्थानत्रयेऽपि तत्त्वाप्रतिबोधलक्षणस्य स्वापस्य तुल्यत्वेन सुषुप्तेर्दुर्ज्ञेयत्वात्तत्स्थानं लक्षयति–यत्रेत्यादि । 'यत्र स्थाने सुप्तो जीवो न कञ्चन कामं कामयते तत्सुषुप्त'मिति । मुक्तिवारणाय सुप्त इति । स्वप्नवारणाय न स्वप्नं पश्यतीति । जाग्रद्वारणाय कञ्चनेति । अन्यथाग्रहणलक्षणस्य स्वप्नस्य जाग्र-

त्यपि सत्त्वात्तथोक्तम् । उत्कर्षबोधनाय न कञ्चन कामं कामयत इति । एवं तत्स्थानं लक्षयित्वा तदुपलक्षितं पादमाह—सुषुप्तस्थान इत्यादि । उक्तलक्षणकं सुषुप्तं तामसोऽन्तःकरणवृत्तिविशेषः स्थानं यस्य स सुषुप्तस्थानः । एकीभूतः संपरिष्वक्तः जीवाविनाभूतः । 'सलिल एको द्रष्टाऽद्वैतो भवती'ति श्रुतेः । प्रज्ञानानि तत्तदिन्द्रियजन्यानि ज्ञानानि, प्रकृष्टं ज्ञानं यैस्तानीन्द्रियाणि वा प्रज्ञानानि तेषां घनः पिण्डीभावो यस्मादसौ प्रज्ञानघनः । 'एतत्सर्वं परे देवे मनस्येकीभवती'ति प्रश्नश्रुतेः । स्वापे सर्वेन्द्रियाणां मनस्येकीभावात्तस्य च निद्राप्रयुक्तत्वात्तस्याश्च विकल्पबुद्धिबीजरूपायाः प्राज्ञे अविनाभावेन स्थितत्वेन तन्नियामकत्वादस्मादेव प्रज्ञानानां घनत्वमतः प्रज्ञानघनः । एवकारेण स्वरूपव्यतिरिक्ततया सर्वज्ञानं निवारितम् । आनन्दमय इति । पूर्वोक्तपादद्वयापेक्षयाऽऽनन्दप्रचुरः । वक्ष्यमाणसर्वेश्वरत्वादिब्रह्मगुणसारत्वात् । ब्रह्मलोकत्वाच्च । 'एष ब्रह्मलोकः सम्राडि'ति श्रुतेः । न[1] त्वसौ परमानन्दः । गणितानन्दत्वात् । न चैवमीषद्दुःखसत्ता शङ्क्या । दुःखस्य द्वैतानुभवकृतत्वेनात्र च तदननुभवस्य वक्ष्यमाणत्वेनात्र तदसिद्धेः । आनन्दमयत्वे गमकमप्याह—

---

१ नचासाविति खपाठः ।

हि यस्मात् आनन्दभुक् । यद्यानन्दमयो न स्यात्पूर्वदुःखभुगपि स्यात् । भोगे द्वारमाह—चेतोमुख इति । केवलबोधलक्षणं स्वभिन्नग्राहकाकारेणापरिणतं चेतश्चित्तं मुखमानन्दोपलब्धिद्वारमस्येति चेतोमुखः । विश्वतैजसयोर्भूतभविष्यदादिज्ञातृत्वेऽपि द्वैतदर्शित्वादस्य च तदभावात्प्राज्ञः । सोऽयं तृतीयः पादोंऽशः ।

स्वरूपमुक्त्वा तस्य माहात्म्यज्ञापनायाऽऽह—

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष
योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥६॥

एष सर्वेश्वर इत्यादि । स्वरूपावस्थत्वात्सर्वस्य भेदजातस्य प्रेरकत्वेन तुरीयवदीशिता सर्वेश्वरः । स्वरूपावस्थता चाद्वैतदर्शित्वेन मोहाभावाज्ज्ञेया । तदाह—सर्वज्ञ इति । सर्वेषां भेदानां स्वाव्यतिरेकेण ज्ञाता सर्वज्ञः । एतज्ज्ञापनायाऽऽह—अन्तर्यामीति । अन्तरनुप्रविश्य नियामकोऽन्तर्यामी । सर्वजगज्जनकत्वाद्योनिरुत्पत्त्यधिकरणं सर्वस्य । एतस्यैव सर्वेश्वरादिरूपतायां नियामकं रूपमाह—प्रभवाप्ययावुत्पत्तिप्रलयौ भूतानां हि यस्मादतस्तदिह न । तस्याः श्रुतेः शारीरपरत्वात् । परिष्वङ्गश्रुत्या तथा निर्णयात् । माण्डूक्ये शारीरस्याप्रस्तुतत्वेनात्र तदभावात् । न[1] चाऽत्र शारीराव्यतिरिक्तत्वम् । परिष्वङ्गश्रुतेः[2] । 'तद्यथा प्रियया

१ न चात्रेति कपुस्तके नास्ति । २ श्रुताविति कपाठः ।

स्त्रिये'ति दृष्टान्तकोपप्रसक्त्या तत्रोपचारस्याशक्यवचनत्वात् । सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यधिकरणे व्यासपादैरपि भेदस्यैव निश्चायनात् । सजातीयतामात्रं परं शारीरे श्रुत्यन्तरेभ्योऽवसीयते । तत्साजात्येन चेदत्रैकत्वादिकमनया युक्त्या प्रतीयत इत्यङ्गीक्रियते, तर्हीदृशस्य परोक्षप्रत्ययस्य शब्दादेव सिद्धेः कृतं तयेति ।

गौडपादकारिकाः—

बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥ १ ॥
दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः ।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥ २ ॥
विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ॥ ३ ॥
स्थूलं तर्पयते विश्वं प्रविविक्तं तु तैजसम् ।
आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ॥ ४ ॥
त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ।
वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥ ५ ॥
प्रभवः सर्वभावानां सतामिति विनिश्चयः ।
सर्वं जनयति प्राणश्चेतोंऽशून्पुरुषः पृथक् ॥ ६ ॥
विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।
स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥ ७ ॥
इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ॥ ८ ॥

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमात्मकामस्य का स्पृहा ॥ ९ ॥

दक्षिणाक्षिमुख इति श्लोकस्तु सर्वज्ञत्वसमर्थनाय । तथात्वं चास्मदादिदेहे एवं स्थित्वाऽस्मदादीनेकदेशाभिमानिनोऽविगणय्यास्मदाद्यधिष्ठितैरेवेन्द्रियैः सर्वानुभवात् । इदं यथा तथोपपादितं द्वितीयस्कन्धसुबोधिन्यां 'स सर्वधीवृत्त्यनुभूतसर्व' इत्यत्र । दक्षिणाक्षिणस्थितिकथनं त्वस्येन्धत्वबोधनार्थम् । 'इन्धो ह वै नाम योऽयं दक्षिणेक्षन्पुरुष' इति 'एष एवेन्द्रो योऽयं दक्षिणेक्षन्पुरुष' इत्यादिश्रुतेः । इन्धो दीप्तिगुणः । एतेनापि शारीराद्भिन्नत्वं स्फुटति । 'गुहां प्रविष्टावि'ति श्रुत्या तस्य हृदि स्थितिकथनात् । कूर्चब्राह्मणे च 'इन्धो ह वै नामे'त्युपक्रम्य 'तस्य ह वा एतस्य पुरुषस्य प्राचीदिक् प्राञ्चः प्राण' इत्यादिना सर्वासां दिशामेतत्प्राणत्वकथनाच्च । अन्यथा दैहिकप्राणैरेव भोगनिर्वाह एतत्कथनवैयर्थ्यापत्तेः । शारीरादात्मनोऽस्य प्रविविक्ताहारत्वकथनवैयर्थ्यापत्तेश्च । अत एव च स्वतो भेदानभ्युपगमोप्यकिञ्चित्कर इति ज्ञेयम् । 'एको देवः सर्वभूतेषु गूढ' इति श्रुतिस्तु ब्रह्माभिप्रायैव । गूढत्वकथनात् । 'अविभक्तं च भूतेष्वि'ति स्मृतिरपि तथा । 'अनादि मत्परं ब्रह्मे'त्युपक्रमात् । 'क्षेत्रज्ञं चापि मां

विद्धि सर्वक्षेत्रेष्वि'त्यपि तथा । सर्वक्षेत्रास्मत्पदाभ्याम् । यदि च सर्वक्षेत्रस्थ एकः क्षेत्रज्ञः शारीरः स्यात्तर्हि चक्षुरादिनियन्तुर्द्रष्टृभेदाभ्युपगमवदिदानीमपि सर्वक्षेत्रेषु स्वाभेदमभ्युपगच्छंस्तद्दृष्टस्वदृष्टवत्पश्येत्सर्वज्ञश्चेदानीं स्यादित्यन्यत्र विस्तरः । अतोऽयं श्लोको विश्वादीनामस्मदादिदेहेषु स्थितिज्ञापनार्थ एव नत्वनुभवप्रदर्शनार्थ इति दिक् । अस्यैकत्वशुद्धत्वे तु ब्रह्मत्वादेव सिद्ध्यतः । सर्वात्मकत्वाच्चासङ्गत्वं पर्यायेणास्य त्रिस्थानत्वाच्च स्थानत्रयव्यतिरिक्तमतो विरुद्धधर्माश्रयत्वं लौकिकयुक्त्याद्यगोचरत्वं च सिद्ध्यति । अग्रिमपादद्वयं च तैजसप्राज्ञरूपेणापि कार्यार्थं स्थितिबोधनाय । तत्र 'मनोमयोऽयं पुरुषः' 'देहं मनोमात्र'मित्यादिश्रुतिस्मृतिषु मनसो जीवलिङ्गत्वकथनात्तस्याप्यन्तःस्थित्वा मानोरथिकादिवृत्तीनां ज्ञानार्थं तैजस इति । आकाशादिपदं चाऽऽनन्दभोगाय । हार्दाकाशे मिथुनीभावार्थं सदीत्यन्तर्यामिरूपेण स्थित्यर्थम् । यद्वा । दक्षिणाक्षिसहितं मुखं तत्र स्थितः । जाग्रत्यासन्यरूपेणापि स्थितिज्ञापनाय मुखपदम् । अग्रिमपादयोरेकैकस्य स्थानद्वयकथनादत्रैवं व्याख्यानेऽप्यदोषः । तथा सत्यन्तरिति शरीरान्तस्तदिन्द्रियरूपेण स्थित्यर्थम् । आकाश इति शरीरान्तराकाशे पञ्चप्राणरूपेण सञ्चारार्थम् । अत एतेऽपर-

ब्रह्मात्मका एवात्राभिप्रेयन्ते । न तु शारीरात्मकाः । शारीरे स्थितिमात्रेण शारीरत्वाभावात् । ॐकारपादत्वात् 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार' इति श्रवणात् । अभिमान इवानभिमानेऽपि तदात्मकतयैव भोगस्या[1]बाधात् । अन्यथा 'ऋतं पिबंता'विति श्रुतिविरोधात् । अनशनश्रुतेर्जीववदशननिषेधकत्वात् । अन्यथाविरोधात् । अतः प्राज्ञस्य शारीरत्वमङ्गीकृत्य स्मरणाख्यव्यापारोपरमे तस्य हृदि प्राणात्मनावस्थाने प्राणस्य व्याकृतत्वेनास्यापि व्याकृतत्वमाशङ्क्य देशकालविशेषाभावादव्याकृतत्वसमर्थनं मुधैव । व्यष्टिरूपताया अत्रानभिप्रेतत्वात् । तथाऽव्याकृतस्य प्राणशब्दवाच्यत्वाय 'प्राणबन्धनं हि सौम्य मन' इति श्रुतिमुपन्यस्य 'सदेव सौम्येद'मिति प्रकृतत्वात्सद्ब्रह्म प्राणशब्दवाच्यमित्याशङ्कापि मुधैव । मूलसतः प्रकृतत्वेऽपि त्रिवृत्कृतस्यापोमयस्य कार्यस्य आपोमयः प्राण इति श्रुत्या प्राणत्वनिश्चयात्तस्य प्रकृतापरामर्शित्वेन तदनुदयात् । अथ स्वापे सर्वेषां प्राणे प्रश्रयणात्प्राज्ञस्य च स्वापसम्बन्धित्वात्तथावस्थानं विभाव्यते । तदाप्यसङ्गतम् । 'सता सौम्य तदा सम्पन्नो भवती'त्यादिश्रुत्या तस्य सद्रूपेणावस्थानस्य निश्चयात् । श्रुत्यन्तरे सतो या

१ भोगस्य बाधादिति खपाठः ।

प्राणशब्दवाच्यता सा तु परब्रह्मरूपत्वेन बीजत्वादेव। नतु सबीजत्वात्। तदतिरिक्तस्य बीजस्याभावात्। नेतिनेतीत्यादीनामेतावत्तेदमित्यादिरूपेण कथननिषेधपरत्वात्। 'न सत्तन्नासदुच्यत' इत्यस्य च लौकिकसदसत्कोटिनिषेधपरत्वात्। अन्यथाऽऽकाशात्मादीनामपि निषेधः स्यात्। तल्लिङ्गाधिकरणादिविषयवाक्येष्वाकाशादिरूपेणापि बीजताया उक्तत्वात्। 'नासदासीन्नो सदासी'दित्यत्र कार्यैकोन्नेयमायादिनिषेधपूर्वक'मानीदवात'मित्यादिना बीजरूपतदेकसत्ताकथनेनापि तथा निश्चयात्। न च सतो बीजत्वपरब्रह्मत्वाभ्युपगमे ज्ञाननाश्यबीजाभावाज्ज्ञानानर्थक्यप्रसङ्गः। अहंममाभिमानस्य सकारणस्य ज्ञाननाश्यस्य सत्वेन ज्ञानसार्थक्योपपत्तेः। 'अक्षरात्परतः पर' इत्यादि तु योनित्वानङ्गीकारविषयम्।

तथा चेदं सिध्यति। सर्वपिण्डात्मा विश्वः, सर्वेन्द्रियात्मा तैजसः, सर्वमनआत्मा सर्वप्राणात्मा वा प्राज्ञः। एवंभा[१]वश्चानभिमानेनेत्येवंरूपः परमात्मैव ज्ञेयो न तु शारीरः। 'स विश्वतैजसप्राज्ञस्तुरीय इति वृत्तिभिः। 'अर्थेन्द्रियाशयज्ञानैर्भगवान्परिभाव्यते'। इति द्वादशस्कन्धवाक्यात्। अर्थस्तु—अर्थात्मना स्थिति-

---

१ एवं भावमानेत्यादि खपाठः।

रथवृत्तिस्तया स्थित्या भगवान् विश्वः परिभाव्यते स्वरूपविचारकैश्चिन्त्यते । एवमिन्द्रियात्मतास्थित्या तैजसः । आसमन्ताच्छेरते सर्वेन्द्रियाण्यस्मिन्नित्याशयो मनः । 'एतत्सर्वं परे देवे मनस्येकी भवती'ति श्रुतेः । प्राणो वा आशयः । 'तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयत' इति श्रुतेः । अत आशयात्मना स्थित्या प्राज्ञः । ज्ञानात्मना स्थित्या तुरीयः । 'अवस्थितेरिति काशकृत्स्न' इति मतमेवं सिद्ध्यति। आत्मा चतुष्पात् विश्वो वैश्वानरस्तैजसो हिरण्यगर्भः प्राज्ञ ईश्वरस्तुरीय इश्वरग्रासः स्वयमीश्वर'इति नृसिंहतापिनीये श्रवणाच्च । जीवस्य विश्वादिरूपता तूपासनेन विद्यया वाऽभिमाननिवृत्तौ जीवन्मुक्तदशायां ब्रह्मभावाविर्भावात् । 'यो यो देवानां प्रत्यबुध्यत स एव तदभवदथर्षीणां तथा मनुष्याणा'मिति श्रुतेः । नत्विदानीमपि । 'मयि तुर्ये स्थितो जह्यात्। तैजसे निद्रयापन्ने पिण्डस्थो नष्टचेतनः । मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमानि'त्येकादशस्कन्धे भेदनिर्देशात् । प्राज्ञसंपरिष्वङ्गान्वारोहयोः श्रवणाच्च । नृसिंहतापिन्या त्रिशारीरारोपेण साम्य[1]मापाद्याभेदभावनाकथनाच्च । यत्तु, स्थूलसूक्ष्मकारणसमष्ट्याभिमानित्वेन विश्वादिरूपताव्युत्पादनं तत्तूक्तविरोधादेवोपे-

१ सामेति कपाठः ।

क्ष्यम्। नच व्यष्ट्यभिमानसमष्ट्यभिमानाभ्यां भेदाभेद-योरुपपत्तेर्न विरोध इति वाच्यम् । 'यद्ब्रह्म विद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्त' इति सर्वभावस्य विद्याज-न्यत्वश्रवणात्तस्याभिमानिकत्वे विद्याया बन्धकत्वा-पत्तेः । तथा सति 'विद्ययाऽमृतमश्नुत' इति श्रुतिविरो-धापत्तेः । वामदेवादीनां चातिबद्धत्वापत्त्या जीवन्मुक्त्यु-च्छेदापत्तेश्च । 'विश्वो हि स्थूले'त्यादिश्लोकद्वयं तूक्ता-र्थम् । 'त्रिषु धामसु यद्भोज्य'मिति श्लोकस्तु भोग्य-भोक्त्रोरपरब्रह्मात्मकत्वज्ञाने 'स सर्वधीवृत्त्यनुभूतसर्व' इति रीत्या तस्यैव भोक्तृत्वज्ञाने च सति स्वस्याभिमान-त्यागेनासत्त्वभावात्तज्जन्यसुखदुःखभागी न भवतीत्येत-द्बोधनाय । 'प्रभवः सर्वभूताना'मिति श्लोकस्तु सन्मा-याभेदेन या द्विधा सृष्टिस्तत्संग्रहाय । तत्र पादत्रयेण सती उच्यते । शेषेण द्वितीया । अत एव पुरुषः कर्त्ता पृथक् पदं चोक्तम् । तत्र प्रथमा 'सदेव सौम्येदमग्र आसीत्' । 'ब्रह्मैवेदमात्मैवेदमग्र आसी'दित्यादि-नोक्ता । द्वितीया तु 'न तत्र रथा न रथयोगा' इत्यादि-नोक्ता । 'विद्धि मायामनोमय'मिति पौराणिकवाक्योक्ता च । तयोरेव भेदाः 'विभूतिं प्रसव'मित्यादिना सार्द्धद्व-येन समुच्चिताः । तत्र स्वरूपे कारणे प्रयोजने च भेदमु-

---

१ भेदभावनेति कपाठः ।

क्तार्द्धेन संगृह्णाति । 'देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहे'ति । तेन क्रीडतोऽयं स्वभावो न तु स्पृहया करणम् । कामस्याभिध्यारूपत्वात् । अभिध्योपदेशसूत्रे तथा निर्णयात् । सृष्टिश्च लीलैव । लीला कैवल्यसूत्राज्ज्ञेया । कालादिश्च स्वयमेव । 'एकमेवाद्वितीयमि'त्यादिश्रुतेः । यत्तु सर्वभावानां विश्वतैजसप्राज्ञानां प्रभव उत्पत्तिरिति व्याख्यानं, तदसत् । अस्य श्लोकस्य 'प्रभवाप्ययौ हि भूताना'मित्येतत्परिकरत्वात् । तत्र च योनित्वात् भूतानामुत्पत्तिप्रलयरूपः प्राज्ञो भवतीत्यर्थकव्याख्यानात् । प्राज्ञोत्पत्त्याकाङ्क्षानुदयेनास्य तद्विरुद्धत्वात् । अस्य स्वतन्त्रत्वे तु अत्रैतस्मिन्यथोक्तेर्थे एते श्लोका भवन्तीति प्रतिज्ञाव्याख्यानविरोधात् । श्लोकसंग्राह्यार्थे मूलवाक्ये तदुत्पत्त्यश्रवणात् । 'वंध्यासुतो न तत्त्वेने'त्यग्रिमप्रकरणस्थं त्वन्तरासृष्टिपरम् । सिद्धे शास्त्रतः सत्वे प्रतीयमानस्य जन्मादेरेव मायिकत्वात् । अत एव च वक्ष्यति, 'सर्वं चेह तु सर्वदा । यं भावं दर्शयेद्यस्य तं भावं स तु पश्यतीति' तत्तत्र मया विवेच्यम् । अत 'श्वेतोंशूनि''त्यस्य व्याख्याने मायामयत्वनिवेश उचितो न तु सर्वत्रेति दिक् । एवं च सृष्टिचिन्तका इत्यस्य व्याख्याने परमार्थचिन्तकानां सृष्टौ नादर इति यदुक्तं तदप्यापातरम्यमेव । 'स्वप्नमायासरूपे'ति 'सृष्टिरन्यैर्विकल्पिते' त्यत्रापि तथा

कल्पिता न तु तादृश्येवेत्यर्थस्यापि सुवचत्वात् । 'इन्द्रो मायाभि'रितिश्रुतेर्मायिकदर्शनपरत्वेन पुंरुरूपभवनपरत्वाभावात् । मधुब्राह्मणेनैतत्पूर्वार्द्धेन च तथा निश्चयादित्युपपादितमन्यत्र । अतो देवस्यैष इत्यर्द्धं सर्वेषां संग्राहकमेव न तु कस्यापि दूषकमिति दिक् । प्रकृतमनुसरामः ।

क्रमप्राप्तं चतुर्थं पादमाह—नान्तःप्रज्ञमित्यादिना ।

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ ७ ॥

पादान्तरस्थाः सप्ताङ्गत्वादयो धर्मा अप्येतदीया एवेत्यस्य दुर्लक्ष्यत्वं बुद्ध्वा तेभ्यो विवेक्तुं साधारणान्कांश्चिद्धर्मान् निषेधंस्तत्स्वरूपं निर्दिदिक्षति । तेनाप्रतिषिद्धमनुमतं भवतीति न्यायेन शेषाभ्यनुज्ञा फलति । तत्र तैजसविश्वाभ्यामस्य विवेकाय नान्तःप्रज्ञं बहिःप्रज्ञमिति । बहिरन्तश्च विकल्पबुद्धिमयं न जनयतीति ताभ्यामयं विविक्त इत्यर्थः । नोभयतःप्रज्ञमिति सर्वज्ञत्वे

१ पुरुषेति खपाठः ।

विवक्षिते प्रज्ञाया विषयप्रमाणाधीनताप्रतिषेधः । 'न तस्य कार्यं करणं च विद्यत'इति श्रुतेः। 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जित'मित्यादिभ्यश्च । तेन सप्ताङ्गैकोनविंशतिमुखपदाभ्यां कार्यं करणं च यत्पूर्वयोरुक्तमासीत्तदत्रैतद्रूपमेव न त्वस्माद्भिन्नम् । सच्चिदानन्दघनत्वेन तत्तद्रूपेण स्वस्यैव भासमानत्वात् । तेन करणादिकृतास्य प्रज्ञानेति प्राज्ञविलक्षणास्य सर्वज्ञतापि बोधिता । तस्य ज्ञानस्य विकल्पबुद्धिरूपताप्रतिषेधाय न प्रज्ञमिति । प्रकृष्टा बीजवदव्याकृताज्ञा बुद्धिर्यस्मिन्निति प्रज्ञस्तद्विलक्षणोऽयम् । नाप्रज्ञमित्यचैतन्यप्रतिषेधः । न प्रज्ञानघनमिति पूर्ववत्प्राज्ञकार्यप्रतिषेधः । अदृष्टमिति चक्षुर्गम्यत्वस्य प्रतिषेधः । अव्यवहार्यमितीन्द्रियान्तरगम्यत्वस्य । अग्राह्यमिति कर्मेन्द्रियगम्यत्वस्य । अलक्ष्यमित्यनुमानगम्यत्वस्य । अलिङ्गमित्युपमानगम्यत्वस्य । अचिन्त्यमिति ध्यानगम्यत्वस्य । अव्यपदेश्यमिति लौकिकशब्दगम्यत्वस्य ॥

एवं निषेधमुखेन सर्ववैलक्षण्यं ज्ञापयित्वा तत्तन्माहात्म्यमाह—एकात्मप्रत्ययसारमिति । एकात्मप्रत्ययैर्ज्ञानिभिः सारोऽनुसरणं यस्य । तैरनुसरणीय इत्यर्थः । प्रपञ्चस्य विस्तारोपशमो यस्मात् स प्रपञ्चोपशमस्तम् । एतस्य परि-

---

१ पादेति कपाठः ।   २ अलक्षेति कपाठः ।

च्छेदत्रयातीतत्वेन तदतिरिक्तस्य विस्तारस्याभावात्तथा । अत एव शान्तमविक्रियम् । शिवं कल्याणरूपमानन्दरूपत्वात्। अद्वैतं भेदविकल्पराहित्यात्।एतादृशं चतुर्थं मन्यन्ते न त्वेतादृश एव सः । 'यतो वाचो निवर्तन्त' इत्यादिषु वाङ्मनोगोचरातीतत्वश्रवणादुक्तरूपत्वेनापि मनोवाग्गोचरतानिषेधायैवमुक्तम् । ननु यद्येवं तदा निरूपणं वृथैवेति शङ्कानिरासायाऽऽह—स आत्मा स विज्ञेय इति । स पूर्वोक्तरीतिक आत्मा विज्ञेय, आत्मत्वतो न वैयर्थ्यमित्यर्थः । तावता श्रुत्यन्तरोक्तं वरणैकलभ्यत्वमेव स्फुटीभवति। अत एव श्रुत्यन्तरे 'अविज्ञातं विजानतां विज्ञातमविजानता'मित्युक्तम् । 'अन्यदेव तद्विदितादथो अविदितादधी'ति च ।

केचित्तु सर्वशब्दप्रवृत्तिनिमित्तशून्यत्वात्सर्वशब्दानभिधेयत्वमिति विशेषनिषेधमुखेन तुरीयनिर्देशोत्रेत्याहुः । तन्न । अत्राशेषविशेषनिषेधादर्शनात् । नापि सर्वशब्दानभिधेयत्वम् । 'सर्वे वेदा यत्पदमामनन्ती'त्यादिश्रुतिविरोधात् । नापि शब्दप्रवृत्तिनिमित्तशून्यत्वम् । उक्तश्रुत्यनुरोधेन स्वरूपस्यैव तत्त्वेनाऽऽदरणीयत्वात् । सर्वेषां पर्यायतापत्तिस्त्वभीष्टावौपनिपादानाम् । तल्लिङ्गाधिकरणादिषु तथा निर्णीतत्वात् ।

---

१ पङ्क्तिद्वयात्मकः पाठः क पुस्तके नास्ति ।

व्यवहारस्य तु शक्तिसङ्कोचादेव सिद्धेः। एवं सति शून्यं तर्हीत्यादिनोक्तौ शङ्कापरिहारावपि मुधैव। अत एव च प्राणादिसर्वासद्विकल्पास्पदत्वेऽपि सदसतोरसंबन्धेऽप्यनया सरण्या शब्दप्रवृत्तिनिमित्ताभावसाधनेऽपि न तत्सिद्धिः। सादृश्यस्यावश्यवक्तव्यत्वात्। अन्यथाऽऽरोपस्याप्यसिद्धेः। अतिप्रसङ्गापत्तेश्च। मृगतृष्णायास्तु प्रौढं शुक्लं सौरं तेज एव रजोवायुसंभिन्नमास्पदं नाकाशः। तथा सति प्रौढतेजोऽभावेऽपि तत्प्रतीतिः स्यात्। तदानीमप्याकाशस्यानपेतत्वात्। नीलस्त्वाकाश एव स्वस्वभावात्प्रतीयते। आकाशं पश्यामीति प्रतीतेरित्यन्यत्र विस्तरः। अत एव मालिन्याद्यारोपोऽपि तत्र सङ्गतः। मायादौ तु सृष्टिरेवान्तरा। स्वप्नवत्तस्या अपि शक्यवचनत्वात्। अन्यख्यातिवादे साकाराया बुद्धेरेव तदुपायेन निर्गमाच्च। अग्रिमप्रकरणे 'अनिश्चिता यथा रज्जु' रिति श्लोके सादृश्यप्रयुक्तभ्रमस्यैव प्रकरणकृताङ्गीकारादितरविधस्य तदनभिप्रेतत्वाच्च। अतः सर्वाकारस्तुरीयः सिद्धः। अत एव चतुष्पात्त्वं प्रतिज्ञाय पादत्रयोक्त्यनन्तरं तदकथनेऽन्यत्वसिद्धावप्येतत्सलक्षणो विलक्षणो वेति संशयानपायात्तज्ज्ञानासिद्धेर्न निषेधानर्थक्यमपि। एवं सति त्रिषु संततस्य तुरीयस्येतरवैलक्षण्यबोधनाय प्रवृत्तं शास्त्रं कार्यनिषेधविज्ञानसमकालमितर-

कोटिं निवर्त्तयत्प्रमाणान्तरं व्यापारान्तरं चानपेक्ष्य शाब्दं जनयति नत्वपरोक्षम् । 'यमेवैष' इति धातुः प्रसादादिति च श्रुतेस्तस्य प्रमेयाधीनत्वात् ॥

अत्रैते श्लोका भवन्ति ।

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ॥
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥ १० ॥
कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ॥
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः ॥ ११ ॥
नाऽऽत्मानं न परांश्चैव न सत्यं चापि नानृतम् ।
प्राज्ञः किंचन संवेत्ति तुर्यं तत्सर्वदृक् सदा ॥ १२ ॥
द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः ॥
बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥ १३ ॥
स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ॥
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥ १४ ॥
अन्यथा गृह्णतः स्वप्नो निद्रातत्त्वमजानतः ॥
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ १५ ॥
अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ॥
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ १६ ॥
प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ॥
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ १७ ॥
विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ॥
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ १८ ॥

एतदग्रिमाः श्लोकास्तु पूर्वसमा एव । तत्र 'निवृत्तेः सर्वदुःखाना'मिति श्लोकस्तुरीयस्य स्वत ईश्वरत्वज्ञापनार्थः । सर्वदुःखानां निवृत्तिरूपस्य प्राज्ञस्यापीश्वर इत्यर्थः । यद्वा । सर्वदुःखनिवृत्तेः प्रभुः तन्निवर्तक इत्यर्थः । तत्र हेतुरीशान इति । 'अथ तुरीय ईश्वरग्रासः स्वराट् स्वयमीश्वरः स्वप्रकाश' इति तापनीयश्रुतेः । विश्वादीनां त्रयाणामेतद्रूपता ज्ञापनाय 'अद्वैत' इत्युत्तरार्द्धम् । यत्तु ईशान इत्यस्य व्याख्यानं प्रभुरिति कैश्चिदुक्तम् । तत्त्वगतिकगतिरूपत्वादेवोपेक्ष्यम् । कार्यकारणबद्धाविति तु तुरीयस्य निर्व्यापारत्वाय विश्वादीनां बहिःप्रज्ञादिजननव्यापृतत्वबोधनपरम् । तेषां मायायुक्तत्वात् । नात्मानं न परानिति तु प्राज्ञविलक्षणसर्वज्ञताबोधनपरम् । न संवेत्तीति तु तुरीयवत्संवेदनव्यतिरेकाय । अन्यथा एष सर्वज्ञ इति पूर्वोक्तश्रुतिविरोधापत्तेः । सप्ताङ्गत्वादीनामप्रतिषिद्धत्वबोधनाय 'तुर्यं तत्सर्वदृक् सदे'ति । सदा सर्वरूपं दृक्रूपं चेत्यर्थः । 'इदं सर्वं यदयमात्मा' 'सर्वं ह्येतद्ब्रह्म' 'अदृष्टो द्रष्टा' । 'नहि द्रष्टुर्दृष्टेर्विपरिलोप'इत्यादिश्रुतेः । द्वैतस्याग्रहणमिति तु पूर्वोक्तोपपादनार्थम् । स्वप्ननिद्रायुताविति तु स्वोक्तप्रामाण्याय वेत्तॄणां बोधानुवादः । अन्यथा गृण्हत इति तु तुरीयप्राप्तीच्छूनां तत्प्राप्त्यधिकारसंपत्तिबोधनाय । अना-

दिमाययेति तु अधिकारे जाते ततो नान्तरीयके स्वस्वरूपज्ञाने जाते तुरीयं पूर्वोक्तरूपं जानातीत्येवंपरम्। तत्रापि यदेति पदादेतद्यत्नेन प्राप्तिः किन्तु 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति श्रुतेः परान्तकाल इति सूच्यते। अन्यथा पूर्वश्लोकेनास्य गतार्थत्वादेतं न वदेत्। प्रपञ्चो यदीति तु भिन्नाधिकारिणां विलम्बासहिष्णूनां विकल्पबुद्धिनिवृत्तये सर्वत्र ब्रह्मस्फूर्तये च द्वैतस्यान्तरासृष्टिरूपताबोधनपरम्। 'विकल्पो विनिवर्तेते'ति तु पूर्वोक्तस्यैव[1] पोषणाय। कल्पितो विकल्पो मानसो यदि केनचित् उपासनेन योगादिसाधनेन मा विशेषतो निवर्तेत। तदा शुद्धे चेतसि उपदेशाज्ज्ञाते[2] तुरीये अयं वादः भेदापादकत्वाद्वैतरूपो न विद्यते। सर्वस्य तदभिन्नत्वे ज्ञाते भेदस्यापि तदनतिरेकात्सोऽपि पूर्वबुद्धरूपाद्वैतो ब्रह्मैव भवतीत्यर्थः। एवमेते नव बोध्याः।

प्रकृतमनुसरामः। एवं ॐमित्येतदक्षरमित्यारभ्य स आत्मा स विज्ञेय इत्यन्तेन सर्वस्य वेदस्य ब्रह्मवाचकत्वे बीजमुपदिश्योङ्कारस्य ब्रह्मवाचकत्वेनान्तरीयत्वेन ब्रह्मात्मकत्वम्। बीजमुपदेष्टुमात्मोङ्कारयोः सादृश्यमुपपादयति–सोऽयमात्मेत्यारभ्यैवमोङ्कार आत्मैवेत्यन्तेन।

---

१ तस्येवेति खपाठः। २ उपदेशाद्दते इति खपाठः॥

सोयमात्माऽध्यक्षरमोङ्कारोऽधिमात्रम् । पादा मात्राः । मात्राश्च पादाः । अकार उकारो मकार इति ॥ ८ ॥

सोऽयं पूर्वप्रकृतश्चतुष्पादा अध्यक्षरं ब्रह्माधिकृत्य वर्तते ओङ्कारो मात्रा अधिकृत्य तासु वर्तते इत्येकं सामान्यम् । न चाधेयत्वे व्यापकत्वहानिः । विरुद्धधर्माधारत्वेनोपपत्तेः । अन्तस्तद्धर्माद्यधिकरणविषयवाक्येष्वाधेयताया अङ्गीकारात् । अतो न दोषः । अपरमाह पादा मात्रा मात्राश्च पादा इति । तत्रापि त्रयाणां पादानां तिसृणामेव च मात्राणां परस्परसाधर्म्यमिति ज्ञापयितुमाह—अकार उकारो मकारश्चेति ।

एवं प्रतिज्ञाय व्याकरोति—जागरितस्थानो वैश्वानरोऽकारः प्रथमामात्रा आप्तेरादिमत्वाद्वेति ।

जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्वाद्वाऽऽप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेद ॥९॥

'अकारो वै सर्वा वागि'ति श्रुत्यन्तरादकारो यथा सर्ववाक् प्रपञ्चव्यापी तथा वैश्वनारोऽपि व्याहृत्युक्तसप्तलोकाङ्गकत्वात्सर्वरूपप्रपञ्चव्यापी । यथा वा अकारः सादिस्तथा वैश्वानरोऽपीति तस्माद्वा सामान्यादनयोर्वै-

श्वानराकारयोरैक्यं व्यपदिश्यत इत्यर्थः । एवं व्यापदेशिकमैक्यमुक्त्वा तथोपासनायां फलमाह—आप्नोति ह वै सर्वान्कामानादिश्च भवति य एवं वेदेति । आदिरिति महतां प्रथम इत्यर्थः । शेषं स्फुटम् । यत्तु अभिधानाभिधयोर्वाङ्मात्रत्वेनैक्यं वदन्ति । तत्तु श्रुतौ साधर्म्यकथनात् केन साम्येनेत्येवं स्वयं व्याख्यानाच्च वदद्व्याघातसाधकमिति तैरप्युपेक्ष्यमित्यलम् । एवमग्रेऽपि ज्ञेयम् ।

स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोपकर्षति ह वै ज्ञानसन्तति समानश्च भवति नास्याऽब्रह्मवित्कुले भवति य एवं वेद ॥ १० ॥

उत्कर्षादिति यथा अकारोपरि वर्तमानत्वेनोकार उत्कृष्टस्तथा विराडुपरि वर्तमानेत्वेन तैजसो हिरण्यगर्भ उत्कृष्टस्तस्मादुत्कर्षादित्यर्थः । उभयत्वादिति । मध्यस्थत्वादित्यर्थः । उत्कर्षति ह वै ज्ञानसंततिमिति । ज्ञानपरम्परां वर्द्धयन्नुत्कृष्टां करोतीत्यर्थः । समानश्च भवतीति । तुल्यदर्शित्वाच्छत्रूणामप्रद्वेष्यो भवतीत्यर्थः ।

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा

मितेरपीतेर्वा मिनोति हवा इदꣳ सर्वम-
पीतिश्च भवति य एवं वेद ॥ ११ ॥

मितेरिति प्रक्षेपात् । डुमिञ् प्रक्षेपणे । यथा उच्चारणे मकारेण नादनिकटेनोकाराकारौ बहिः प्रेर्येते, तथा प्राज्ञेन सृष्टिदशायां विश्वतैजसौ, तस्मादित्यर्थः । अपीतिः प्रलयादेकीभावात् । यथोङ्कारसमासावन्त्याक्षरे मकारउकाराकारौ लीयेते तथा प्रलयदशायां विश्वतैजसौ प्राज्ञे, तस्माद्वेत्यर्थः । मिनोति ह वा इदं सर्वमपीतिश्च भवतीति । बहिः प्रक्षिपन्नन्तश्च प्रवेशयन् जगत्कारणात्मा भवतीत्यर्थः । अङ्गोपासनायां फलवचनं पूर्णोपासनाया महाफलबोधनाय ।

अत्रैते श्लोका भवन्ति

विश्वस्यात्व विवक्षायामादिसामान्यमुत्कटम् ॥
मात्रासंप्रतिपत्तौ स्यादाप्तिसामान्यमेव च ॥ १९ ॥
तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फुटम् ॥
मात्रासंप्रतिपत्तौ स्यादुभयत्वं तथाविधम् ॥ २० ॥
मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् ॥
मात्रासंप्रतिपत्तौ तु लयसामान्यमेवच ॥ २१ ॥
त्रिषु धामसु यत्तुल्यं सामान्यं वेत्तिनिश्चितः ॥
स पूज्यः सर्वभूतानां वन्द्यश्चैव महामुनिः ॥ २२ ॥

अकारो नयते विश्वमुकारश्चापि तैजसम् ॥
मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः ॥ २३ ॥

अत्रापि पूर्ववत् पञ्चश्लोकाः । तत्र विश्वस्यात्वविवक्षायामित्यादीनां त्रयाणां पूर्वार्द्धेषु पादानां मात्रत्वे विवक्षिते पूर्वार्द्धोक्तं सामान्यं स्फुटं भवतीत्युच्यते । उत्तरार्द्धेषु तु मात्राणां पादत्वज्ञाने उत्तरार्द्धोक्तं [1]सामान्यं स्फुटतीत्युच्यते । तेन व्यापदेशिकमेवैक्यं न तु वास्तवमिति पूर्वोक्तमेव फलति । न तु पापानां वाङ्मात्रत्वं साम्यकथनवैयर्थ्यापातात् । यत्तु, आत्वविवक्षायामित्यस्य व्याख्यानं मात्रासंप्रतिपत्ताविती त्युक्तं, तदसत् । व्याख्येयश्रुतौ द्विविधोद्देश्यविधेयभावोक्त्या द्विधावेदनस्य विवक्षितत्वेनास्य तद्विरुद्धत्वात् । श्लोकप्रथमपादेनैव निर्वाहात्तृतीयपादवैयर्थ्यापत्तेश्च । 'त्रिषु धामस्वि' त्यादिश्लोकद्वयं तु 'आप्नोति ह वे'त्याद्युक्तफलानां व्याख्यानाय । 'नामात्रा विद्यते गति'रिति पादस्तु मात्रात्रयोपासनया तुरीयप्राप्तिर्न भवतीत्यार्थिकसमर्पणाय ।

प्रकृतमनुसरामः । साधर्म्यद्वयमुक्त्वा तृतीयं मुख्यं वास्तवं बीजमाह—

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः

१ पदमेतत् खपुस्तके नास्ति ।

शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्या-
त्मनाऽऽत्मानं य एवं वेद ॥ १२ ॥

अमात्रश्चतुर्थोऽव्यवहार्यं प्रपञ्चोपशमः शिवोऽद्वैत इति । अमात्रो नादश्चतुर्थः । तुरीयपादाभिन्न इत्यर्थः । कुत इत्याकाङ्क्षायां हेतुगर्भाणि स्वरूपाप्रच्यवबोधकानि चत्वारि पादविशेषणान्यस्मिन्नाह—अव्यवहार्यं इत्यादि । तथा चादृष्टाग्राह्यादिसप्तविशेषणोक्तधर्माभावेऽप्युक्तधर्म-चतुष्टयसत्तया तत्प्रत्यासन्नत्वाच्च तदभिन्न एवेत्यर्थः । तथोक्तं द्वादशस्कन्धे सूतेन 'समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः । हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते । यदुपासनया ब्रह्मन्योगिनो मलमात्मनः । द्रव्यक्रियाका-रकाख्यं धूत्वा यान्त्यपुनर्भवम् । ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् । यत्तल्लिङ्गं भगवतो ब्रह्मणः पर-मेष्ठिनः । शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यधृक् । येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मन'इति । तथा च साक्षादात्मनः सकाशाद्व्यक्तत्वेनात्मप्रत्यासन्नोऽयम् । आत्मा चात्र पर एवाभिप्रेयते । न तु शारीरः श्रुत्यन्तर-विरोधादित्युपपादितमधस्तात् । एवं सर्वं साधर्म्यादि-कमुक्त्वोपसंहरति-एवमोङ्कार आत्मैवेति । एवं नादस्य तुरीयधर्मवत्त्वेन मात्रान्तराणां पादान्तरसाधर्म्येणाधि-ष्ठेयत्वसाम्येन चोङ्कारो मुख्यगौणवृत्तिभ्यामात्माभिन्न

इत्यर्थः । आत्माभिन्नत्वादेवाक्षराभिन्नो ज्ञेयः । तदेवं सर्वस्य वेदस्य ब्रह्मवाचकत्वे एवं बीजमुपदिश्य संपूर्णोपासनायाः फलमाह—संविशत्यात्मनाऽऽत्मानं य एवं वेदेति । संविशत्युपभुङ्क्ते । तथा च ब्रह्मविदाप्नोति परमिति ब्राह्मणव्याख्यानरूपायामृचि 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते' त्यनेन भगवदात्मककामाशनरूपं यत्फलमुक्तं तदेवात्रैवमुक्तमिति न काप्यनुपपत्तिः । अत्रापि षट् श्लोकाः पूर्ववत्सन्ति प्रणवस्तावकाः । तत्र व्यश्नुते तदनन्तरमित्यनेन ज्ञेयादनन्तरं यत्तुरीयं तद्विशेषेणाप्नोतीत्यर्थ उच्यते । शेषं स्फुटमित्युपरम्यते ।

इति श्रीमद्बालकृष्णप्रभुपदरजोभिषिक्तेन श्रीमदाचार्यचरणदासेन पुरुषोत्तमेन विरचिता माण्डूक्यदीपिका सम्पूर्णा ॥

---

१ वेदस्येति नास्ति खपुस्तके ।

श्रीकृष्णाय नमः ।

अथ वैतथ्यप्रकरणटीकाप्रारम्भः ।

अथाखण्डाद्वयात्मज्ञानसाधनीभूतपरमात्मतत्त्वज्ञानोपदेशनायोपदिष्टस्थैर्याय च जडचर्यां यादृच्छिकत्वं चोपदेष्टुमुपदेक्ष्यमाणज्ञानविषयस्यात्मनः सर्वात्मकत्वलक्षणे स्वरूपे बोधनीये तद्विरोधिनः प्रतीयमानस्य काल्पनिकस्य भेदस्य निरासाय भेदवाद्यभिमतप्रपञ्चस्य मिथ्यात्वं प्रतिपादयिष्यन् प्रथमतः स्वाप्निकस्य मिथ्यात्वं त्रिभिः श्लोकैः प्रतिपादयति वैतथ्यमिति—

वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः ।
अन्तःस्थानात्तु भावानां संवृतत्वेन हेतुना ॥ १ ॥
अदीर्घत्वाच्च कालस्य गत्वा देशान्न पश्यति ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन् देशे न विद्यते ॥ २ ॥
अभावश्च रथादीनां श्रूयते न्यायपूर्वकम् ।
वैतथ्यं तेन वै प्राप्तं स्वप्न आहुः प्रकाशितम् ॥ ३ ॥

उक्तवैतथ्यसिद्ध्यर्थं न्यायमाह—अन्तरित्यादि । शरीरान्तःस्थानादित्यर्थः । संवृतत्वेनेत्यत्रापि तथा । तथा च स्वाप्निकाः सर्वभावभेदाः शरीरान्तःस्थाः । शरीरसंवृतत्वात् ।

---

१ एतत्प्रकरणस्यैकमेव पुस्तकं लब्धं तच्च बहुषु स्थलेषु शुद्धेतरदिति स्खलितानि यथामति शोधितान्यप्यवशिष्टान्येवेति साधुधियः क्षमध्वम् । संस्कर्ता ।

यद्यत्संवृतं तत्तदन्तःस्थम्। गृहकुम्भवत्। यद्वा। शरीरसंवृतं तच्छरीरान्तःस्थम्। शिरांत्रादिवदितिन्यायेनान्तरत्वे सिद्धे तद्विरुद्धबाह्यत्वमहत्वादीनां तेष्वसम्भवात्। तदद्वयाभासमानास्ते भावभेदा वितथा इत्यर्थः। बाह्यत्वादिभानात्पक्षे हेत्वसिद्धिर्हेतोः साध्यसमत्वं वा सत्प्रतिपक्षत्वं चेत्याशङ्कायां तन्निरासाय न्यायान्तरमाह—अदीर्घत्वादिति। स्वप्नदर्शनावच्छिन्नस्य कालस्यादीर्घत्वादल्पसूर्यपरिस्पन्दपरिच्छिन्नत्वाद्देशान् दूरस्थान् गत्वा न पश्यति, किन्तु यत्र सुप्तस्तत्रैव, अतोऽप्यबाह्याः। तथा च तेऽबाह्या अदीर्घकालदर्शनकत्वाद्दृश्यमानदेशगमनानपेक्षदर्शनकत्वाच्चेति न्यायाभ्यां प्रत्युत बाह्यत्वस्यैव साध्यसमत्वमित्यर्थः। एतदुपष्टम्भाय तर्कमाह—प्रतिबुद्ध इति।

तथा च यदि गत्वा पश्येत् तं देशं प्रपश्यन् प्रतिबुद्धस्तत्रैव तिष्ठेत्। यतो नैव मतो नैवं, यतो न गत्वा पश्यति ततोऽन्तरेव पश्यतीत्यदीर्घकालकदर्शनत्वादिः सद्धेतुः। तेन च संवृतत्वं सद्धेतुरिति तथेत्यर्थः। एतन्मतोपष्टम्भाय श्रुत्यन्तरसम्मतिमप्याह—अभाव इत्यादि। श्रूयते इति, वाजसनेयिनां बृहादारण्यके श्रूयत इत्यर्थः। न्यायपूर्वकमिति। 'स्वप्नान्त उच्चावचमीयमान' इति मन्त्रेणानेकरूपकरणमुक्त्वा 'तस्मान्नायतं बोधयेद्दुर्भैषज्यं हास्मै भवती'त्यनेन सुप्तस्य निर्बन्धेन जागरणे कष्ट-

माह—यद्यन्यत्र गतो भवेत्तत्करणं न वदेद् दुर्भैषज्यं च । यत्र सुप्तस्तत्रैव स्त्रिया स्वप्ने रममाणः स्खलिते जाग्रंस्तां बहिः पश्येत् । यतो न पश्यति ततः करोति यतः करोति ततो रथाद्यभावः । एवं च स्वप्ने पूर्वं रथाद्यभावः पश्चात्करणादित्यादिन्यायपूर्वकमित्यर्थः ।

एवं च स्वाप्निकानामान्तरत्वं साधयित्वा वैतथ्यं निगमयन् वक्तॄणां मनीषित्वं दृढीकरोति-वैतथ्यमिति । एतेन ये स्वप्ने चिन्तामण्यादिसिद्धसृष्टिन्यायेनानुपादानकां सत्यां सृष्टिं वदन्ति ते निरस्ताः । पूर्वोक्तन्यायानां तत्प्रतिपक्षत्वात् । अनुपादानकत्वे अवयवादि विघटनेऽपि नाशासम्भवापत्त्या चिन्तामण्यादिसिद्धसृष्टावपि तथात्वस्य विप्रतिपन्नत्वाच्चेति ॥ १ ॥ २ ॥ ३ ॥

एवं त्रिभिर्दृष्टान्तार्थं स्वप्नदृष्टेर्मिथ्यात्वं साधयित्वा जाग्रत्प्रपञ्चस्यापि भिन्नस्यातत्त्वे आत्माद्वयसिद्धिर्नेति तदर्थमन्तःस्थायां जाग्रत्सृष्टौ मिथ्यात्वमतिदिशति—

अन्तःस्थानात्तु भेदानां तथा जागरिते स्मृतम् ।
यथा तत्र तथा स्वप्ने संवृतत्वेन भिद्यते ॥ ४ ॥

अन्तःस्थेति । तथेति । अन्तःस्थत्वाद्वैतथ्यमित्यर्थः । स्मृतमिति । मनीषिभिः स्मृतं, अस्य प्रमेयस्य पुराणेषु ऋतेऽर्थमित्यादौ प्रसिद्धेः । स्मृतित्वज्ञापनाय वा स्मृतमिति । यद्वै किञ्च मनुरवदत्तद्भेषजमितिवत् । तावता

तासामप्यविरुद्धानां प्रामाण्यमित्यप्युक्तं भवति । जागरित इति । बहिरनुभवात् कथमन्तःस्थत्वमित्याकाङ्क्षायां स्वप्नतुल्यत्वादिति वक्तुं स्वप्नस्यैतत्तौल्यमाह–यथा तत्रेति । यथा जागरिते मनोध्यातोर्थः शरीरसंवृतत्वेन बाह्येभ्यो भिद्यत इति शरीरान्तःस्थत्वं तथा स्वप्नेऽपि पूर्वमुक्तं, अतस्तत्तुल्यत्वात्तथेत्यर्थः ॥ ४ ॥

एतदेव प्रपञ्चयति–

स्वप्नजागरितस्थाने ह्येकमाहुर्मनीषिणः ।
भेदानां हि समत्वेन प्रसिद्धेनैव हेतुना ॥ ५ ॥

स्वप्नेत्यादि । एकमिति । एकजातीये । अत्यन्तसाजात्यायैकवचनम् । तत्र हेतुः–भेदानामित्यादि । प्रसिद्धेनेति । उक्तरीत्याऽत्यन्तं सिद्धेन । तथा च संवृतत्वादिना हेतुना भेदानां वितथत्वसाम्यादुभे स्थानेऽत्यन्तमेकजातीये इत्यर्थः ॥ ५ ॥

स्वप्ने हि सृजति । जाग्रति तु बहिर्दृष्टं । ध्यायति, ध्यानस्मरणयोरैकार्थ्यात् स्मरणगोचरतामात्रं भवति इत्यन्तःस्थत्वेऽपि कथं मिथ्यात्वमित्याशङ्कायां ध्यातस्य मिथ्यात्वप्रकारमाह–

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ ६ ॥

आदावित्यादि, । असत्सत्त्वासदसत्त्वयोः श्रुत्यन्तरे निर-

स्तत्वात् ध्यातस्य च मनःकल्पितत्वेन पूर्वं पश्चाच्चासत्वाद्वितथैः स्वाप्निकैस्तुल्यत्वान्मिथ्याकल्पनत्वम् । न हि माणवकः सिंहत्वेन ध्यातः सिंहो भवतीति । तथा च मनोध्याताः पदार्थाः वर्तमानतयानुभूयमानत्वेऽप्यसन्तः आद्यन्तयोरसत्वात् । यदनन्तवदसत्यवदिति ।

एवं च मनोध्यातानां बाह्यतुल्यत्वं चेति फलति । नच ध्यानस्य स्मरणपर्यायत्वं मनःक्रियारूपत्वेनात्राभिप्रेतत्वात्; देवतायाः अननुभूतत्वेन तद्ध्याने स्मरणत्वस्याशक्यवचनत्वाच्च । तर्हि कल्पनोपदिष्टात् फलसिद्धिर्न स्यात् वितथस्य फलाजनकत्वादित्याशङ्कायामाह—

सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।
तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥ ७ ॥

सप्रयोजनतेति । स्वाप्निकप्रमदास्पर्शादिना पारमार्थिकस्खलनदर्शनात् सप्रयोजनता स्वप्नेऽपि विप्रतिपन्नाऽतो किञ्चित्करा सती सत्वसाधिकेत्यर्थः । तथा च मनोध्याताः सत्याः सत्फलजनकत्वात् घटादिवदिति साधने स्वाप्निकप्रमदास्पर्शवदिति दृष्टान्तस्य हृदि करणाद्धेतोः साधारणत्वं दर्शितम् । तथा च सत्यसत्याः आद्यन्तवत्त्वात्तेन वितथसदृशत्वाच्चेति हेतुर्दृढीकृतः । विमताः मनोध्याताः सन्तः अर्थक्रियोत्पादकत्वाद् घटादिवदित्यपि निरस्तम् । स्मृता इति । पूर्ववत् ।

तथा च श्रुतिगीतायां 'न यदिदमग्र आस न भविष्यदतो निधनादनुमितमन्तरा त्वयि विभाति मृषैकरस' इति। एकादशे च 'न यत्पुरस्तादुत यन्न पश्चान्मध्येऽपि तन्न व्यपदेशमात्र'मिति। यद्येवं तर्हि स्वर्गकामादि-श्रुत्युपप्लवः स्वर्गस्यापूर्वजत्वेनापूर्वस्यास्मदादिकर्मजन्य-त्वेन च कीर्त्तनादिनाश्यत्वेन चाद्यन्तवत्त्वादित्याश-ङ्कायामाह–

अपूर्वं स्थानिधर्मो हि यथा स्वर्गनिवासिनाम्।
तानयं प्रेक्षते गत्वा यथैवेह सुशिक्षितः ॥ ८ ॥

अपूर्वेति। अपूर्वमस्मत्क्रियाभिव्यक्तं कर्म, स्थानि-धर्मः स्थानिनः जाग्रदादिस्थानवतो भगवतो धर्मः, स यथा स्वर्गनिवासिनां तथा। स्वर्गस्था हि देवास्तन्नियामकत्वेन भगवता परमेश्वरेण स्थापिताः सर्वदा तत्र निवसन्ति। तेषां स्वर्गो नापूर्वसाध्योऽपि तु भगवदवयवात्मैवेति नित्य एव। नाप्यपूर्वं स्थानिधर्मः कर्म-साध्यः किन्तु भगवदवयवात्मनस्तत्वेन स्मृतौ प्रसिद्धो नित्य एव, तथैव तत्क्रियया योऽभिव्यज्यते सोऽपि स एवेति नित्य एव। स्वर्गोऽपि तथा। सम्बन्धमात्रं परं जन्यते। अतो न कर्मश्रुत्युपप्लव इत्यर्थः। न चैवं सिद्धा-र्थबोधकत्वेनाधिगतार्थगन्तृत्वाद्विध्यप्रामाण्यं शङ्क्यम्। लोकानधिगतार्थगन्तृत्वस्य तदर्थत्वेन प्रामाण्यानपा-

यात् । अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यावित्यादिश्रुत्यतिरिक्तस्य लौकिकमानस्य तदर्थागमकत्वात् । अन्यथा सकृद्बोधितार्थस्य विधेः कालान्तरे पुनर्बोधनेऽप्यप्रामाण्यापत्तेः । उपपादितं चेदमाचार्यैरीक्षत्यधिकरणे । नित्यतामेव प्रकटयति—तानयमिति । अयं कर्मणा धर्माभिव्यञ्जकः इतः स्वर्गे गत्वा तान्स्वर्गवासिनः स्वर्गान् वा स्वाभिषजैस्तान् धर्मान् वा प्रेक्षते दिव्यचक्षुषि लब्धे साक्षात् करोति । तत्रापि विशेषः—यथैवेह सुशिक्षित इति । येन प्रकारेण भगवद्रूपतया अपूर्वतया नित्यकर्मतया वा तत्स्वरूपज्ञाने उपाध्यायेन सुतरां दत्तशिक्षस्तथेति । तथा च यादृक् स्वरूपं स्वर्गादीनां इह ज्ञातं तादृक् तत्र पश्यति । यदि नित्यो न स्यात्, तर्ह्येतदद्दश्यैतत्समवेतत्वादत्रैव स्वर्गः स्यात् । तत्र गते वास्मिन्स्वर्ग उत्पद्येत, जीवानामणुत्वात् । व्यापकजीववादस्य श्रुत्यगोचरत्वात् । अणुत्वं चोपपादितं 'तद्गुणसारत्वाधिकरण' आचार्यैः । एवं निरस्तेऽपि दोषे जन्यत्वात् बाह्यघटपदादिदृष्टान्तेन सत्यत्वसाधने तत्प्रतिसाधनाय बाह्यत्वेन प्रतीतस्य स्वरूपमाह—स्वप्नेत्यारभ्य दृष्टमित्यन्तेन—

स्वप्नवृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत् ।
बहिश्चेतोगृहीतं सद् दृष्टं वैतथ्यमेतयोः ॥ ९ ॥

तथा च स्वप्ने यदा स्वप्नजागरौ भासेते तदास्मिन्जागरे स्वाप्निकत्वेन भासस्यासत्वं बाह्यत्वेन भासस्य च सत्त्वमभिमन्यते, तत्र पूर्वोक्तन्यायैरुभयोर्मिथ्यात्वमेव सिद्धम्। तथा जाग्रद्वृत्तावप्यन्तर्देवोऽहं राजाऽहमित्यादिकल्पितस्य बहिर्घटादिरूपेण गृहीतस्य च मिथ्यात्वमेव। बाह्यत्वभावनस्य जागरितभातत्वस्य भानस्य चोभयत्रापि तुल्यत्वेन प्रत्यक्षस्याप्रयोजकत्वात्। दृष्टमित्यनेनैन्द्रिजालिकपदार्थानां बाह्यत्वेन प्रतीतानामपि मिथ्यात्वस्य दृष्टत्वाच्चेत्यप्युक्तम् ॥ ९ ॥

एवं सर्वस्य मिथ्यात्वे प्राप्ते द्रष्टुरपि तदनतिरिक्तत्वान्मिथ्यात्वमिति शून्यवादापत्तिमाशङ्कते—

उभयोरपि वैतथ्यं भेदानां स्थानयोर्यदि।
क एतान् बुध्यते भेदान् को वै तेषां विकल्पकः ॥१०॥

उभयोरिति। द्रष्टृ[1]भानस्यापि वितथत्वाच्छून्यं तर्हीत्यर्थः। तत्र समादधानः सिद्धान्तमाह, कल्पयतीत्यनेन—

कल्पयत्यात्मनाऽऽत्मानमात्मा देवः स्वमायया।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ११ ॥

अत्र देव इति क्रीडापरत्वमुक्तम्। तेनेयं कल्पना क्रीडा

---

१ द्रष्ट स्यात्।

रूपेतिफलति। कल्पयत्यात्मनात्मानमात्मेतिविभक्तित्रयेण कारकत्रयात्मकत्वं स्वस्यैवेत्युक्तम् । तत्रोपलक्षणविधया सर्वात्मत्वं सर्वकारकत्वं च साधितम्। आकाराभेदे कारकभेदाभावात् । तत्तद्रूपे स्वस्मिन् तत्तन्नामनियमनमिति कल्पनास्वरूपमप्यनेनैवोक्तम् । अन्यथात्मानमित्यस्य व्याकोपात् । आत्मनीति पाठे तुल्य एवार्थः । कल्पने करणमुक्त्वा भेदबोधे करणान्तरमाह—स्वमाययेति । स्वपदेन शक्तेरभिन्नत्वमधीनत्वं चोक्तम् । मध्ये कथनेन क्रीडाकरणत्वमपि । तात्पर्यानभिज्ञानां वाक्याभासादिकं पुरस्कृत्य प्रत्यवतिष्ठतां मुखमुद्रणायाऽऽह—इति वेदान्तनिश्चय इति । तेनेदं फलति स सर्वात्मकः परमात्मा क्रीडन् स्वात्मकान्येव रूपाणि तादृशैरेव नामभिर्नियमयति । स्वमायया स एव भेदान् स्वात्मरूपान्बुध्यते । यथा पुरुषः शङ्खसुरभिमत्स्यादिमुद्राः स्वाङ्गुलीभिर्विधाय तासु तत्तद्रूपतामनुसन्धत्ते तद्वत् । इदं चाहिकुण्डलसूत्रे उक्तं व्यासचरणैः । अतो न चोद्यावसरः ।

एवं सिद्धान्ते सत्यतैवात्मरूपत्वेन सर्वस्य प्राप्ता, न तु कस्यापि मिथ्यात्वमिति पूर्वोक्तमुपपादनं वृथैव जातम्।पूर्वोक्तयुक्तीनां च बलवत्वात् सिद्धान्तस्याज्ञानमात्रतयोपचरितार्थत्वं चेति शङ्काद्वयनिरासायैतद् व्याकरिष्यन्नेव पूर्वोपपादितसमर्थकं कल्पनाद्वयमन्यदाह—

विकरोत्यपरान् भावानन्तश्चित्तेऽव्यवस्थितान् ।
नियतांश्च बहिश्चित्ते एवं कल्पयते प्रभुः ॥ १२ ॥

विकरोतीति । विकृतान्करोतीत्यर्थः । अपरानिति । स्वात्मरूपेभ्योऽतिरिक्तान् मायामनोमयान् । अव्यवस्थितानिति । स्वप्ने गजरूपेण दृष्टस्यापि नरहयादिरूपेण दर्शनान्मनोरथकल्पनायां रङ्कस्य विरूपस्य सुन्दरत्वराजत्वादिना कल्पनादव्यवस्थितान् । आन्तरानुक्त्वा बाह्यानाह—नियतानिति । घटो घटरूपेण, पटः पटरूपेणेत्येवं नियतानित्यर्थः । वितथकल्पनेऽपि सामर्थ्यार्थं प्रभुरिति ॥ १३ ॥

एवमान्तरबाह्यभेदेन द्विविधान्कल्पितानुक्त्वा, उक्तसमर्थनाय तेषां वैतथ्यं विशदयति—चित्तकाला इति द्वाभ्याम् ।

चित्तकाला हि येऽन्तस्तु द्वयकालाश्च ये बहिः ।
कल्पिता एव ते सर्वे विशेषो नान्यहेतुकः ॥ १३ ॥
अव्यक्ता एव येऽन्तस्तु स्फुटा एव च ये बहिः ।
कल्पिता एव ते सर्वे विशेषस्त्विन्द्रियान्तरे ॥ १४ ॥

तत्र पूर्वेण स्वाप्निकानां तथात्वमाह । स्वाप्निकजागरेऽपि ज्ञानस्य विषयेन्द्रियसंप्रयोगतन्त्रत्वाभिमानाद्द्वयकाला इत्युक्तम् । नान्यहेतुक इति । चित्तान्वय

व्यतिरेकानुविधाच्चित्तैरहेतुका न (?)। किन्तु चित्तहेतुका एव।

यद्वा कल्पितपदोपादानात् कल्पितत्वेन रूपेणात्महेतुकाः कल्पनामात्रहेतुका वा इत्यर्थः । तेन वैतथ्यमुक्तम्।

जागरकल्पितानां तथात्वमाह—अव्यक्ता इति । ननु जाग्रद्वृत्तौ विषयेन्द्रियसंप्रयोगाद् घटादिर्गृह्यत इति केवलचित्तग्राह्याभावात् कथं कल्पितत्वम् । अस्तु वा यथा तथा, तथापि बहिर्गृह्यमाणानामान्तरत्वाभावात् सर्वात्मकत्वादात्मनः सत्सृष्टेरप्युक्तत्वेन तस्या एव च संप्रयोगघटकतया बाह्यत्वेन तदितराप्रसिद्ध्या च कस्य बाह्यस्य कल्पितत्वमित्याशङ्काद्वयनिवृत्त्यर्थमाह—विशेषस्त्विन्द्रियान्तर इति। बाह्यतया कल्पितो यो विशेषः स त्विन्द्रियतत्संयुक्तयोरन्तराले गोलकान्तर इत्यर्थः । अन्तरं रन्ध्रावकाशयोरिति कोशात्। विशेषा इति पाठेऽप्ययमेवार्थः ।

नन्विदमप्रयोजकं, भ्रमरिकादृष्ट्या कामलादौ चान्तरालिकस्य भ्रमिपीतिमादेर्गोलकान्तरेव प्रत्यक्षेण निश्चयादस्यापि तत्रैव वक्तव्यत्वात्। विविधरङ्गरक्तकाचाद्युपनेत्राणि मध्ये निधाय निकटदूरस्थवस्तून्यवलोकयतां विषयगोलकयोरनुपरागेऽपि कतिपयनायन-

किरणेषूपधीयमानेषु विषये रागोपलम्भाभिमानस्य सार्वजनीनत्वाच्च । तथा चान्तराले गोलकांजयिमानस्य कल्पितत्वं वैतथ्यं बाह्यत्वं चेति फलति। तेन पूर्वोपपादितं समर्थितं भवति। अत एवैकादशे द्वाविंशाध्याये इन्द्रियायनसृष्ट्येदं त्रैविध्यं भाति वस्तुनि। बहिरन्तर्भिदा हेतुर्जनोऽसज्जनकृद्यथेत्युक्तम् । इयमेव च सृष्टिरन्तरा सृष्टिरित्यन्यदित्यनृतमिति मायामनोमयेति च श्रुतिपुराणेषु गीयते। 'अनृतं वै वाचा वदति अनृतं मनसा ध्यायति' 'अनृतापिधानाः' 'न तं विदाथ य इमा जनानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति' इति । एकादशस्कन्धे च 'न ते मामङ्ग जानन्ति हृदिस्थं य इदं यतः। उक्थशास्त्रा ह्यसुतृपो यथा नीहारचक्षुष' इति । 'यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः। नश्वरं गृह्यमाणं च विद्धि मायामनोमय'मिति 'मायान्तरापतति नाद्यपवर्गयोर्यदिति च। द्वितीयस्कन्धे' ऋतेर्थं यतत्प्रतीत्यत्र एतत्सुबोधिन्यां 'अतो विषये विषयता काचित्स्वीकार्या यया दृष्टिः सविषया भवती'त्यादिना चोपपाद्य विवृता ॥ १५ ॥

---

१ गोलकाज्जायेति स्यात् ।

एवं द्वाभ्या प्रतिज्ञां समर्थ्य कल्पयतीत्यादिमन्त्रद्वयोक्तकल्पनाद्वयप्रकारं द्वाभ्यां विवृणोति—जीवं कल्पयत इत्यादि—

जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान् ।
बाह्यानाध्यात्मिकांश्चैव यथाविद्यस्तथास्मृतिः ॥ १५ ॥
अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ १६ ॥

तत्र प्रथमश्लोकोक्तकल्पनाप्रकारं विवृणोति—जीवमिति । जीवं प्राणधारणप्रयत्नवन्तं मुख्यजीवं हिरण्यगर्भं वा, पूर्वं कल्पयते । तेन नाम्ना तद्रूपं आत्मानं नियमयति । तदुत्तरं बाह्यान् शरीरतद्भोग्यान्, आध्यात्मिकान् करुणादिरूपान् बुद्धीन्द्रियमनःप्राणादीन् । कल्पयत इति पूर्ववत् । पृथग्विधानीत्यनेन प्रकाराणामेव परस्परं भेदो न तु स्वरूपस्येत्युक्तम् । जीवकल्पनोपकरणमाह—तथाविद्य इति । यादृक् ज्ञानं पूर्वं भवति तथादेवमानुषासुररूपभेदेन जीवे नामरूपं नियमयतीत्यर्थः । ततो भावानित्याद्युक्तभोग्यकल्पनोपकरणमाह—तथास्मृतिरिति । यादृशजीवे यादृग्बाह्याध्यात्मिकं भोग्याद्यपेक्षितं तस्मै तस्मै तादृशं तादृशं तत्तन्नामरूपं तत्र तत्र नियमयतीत्यर्थः ॥ १६ ॥

एवमेकेन प्रथमकल्पनाप्रकारमुक्त्वा विकरोत्यपरा-

नित्यनेनोक्तकल्पनायाः प्रकारमाह—अनिश्चितेत्यनेन। अत एवाऽत्र व्युपसर्ग उक्तः।

तथा च विकरोतीति श्लोकोक्तकल्पना विकल्पनारूपाऽत्र न तु तत्र पदार्थः स इत्यर्थः॥ १७॥

एवं द्वाभ्यां द्वयं विवृत्य विकरोतीत्यनेनोक्तायाः द्वितीयस्या अज्ञानकल्पितत्वाज्ज्ञाननाश्यत्वमाह—

निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते।
रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः॥ १७॥
प्राणादिभिरनन्तैश्च भावैरेतैर्विकल्पितः।
मायैषा तस्य देवस्य ययाऽयं मोहितः स्वयम्॥ १८॥

निश्चितायामिति। तद्वदात्मविनिश्चय इति। विशिष्टः आत्यन्तिकः निश्चयः प्रमाणज्ञानं यस्य तादृश आत्मा तद्वत्। निश्चितरज्जुवदद्वैतो भवति। सर्वाकारत्वेन ज्ञातः कल्पितद्वैतभावज्ञाननिवर्त्तको भवतीत्यर्थः। रज्जुसर्पादिभावैरिवात्मकैर्भावैर्विकल्पितस्तत्रान्धकार इवात्रानिश्चयहेतुश्च क इत्याकाङ्क्षायामाह—प्राणादिभिरिति। तथा च यथात्र रज्ज्वाकारसदृक्षाः सर्पधारादिभावा एवमात्मनः सर्वाकारत्वात् तत्तदेकदेशाकारसदृक्षा अनेके प्राणादिभावास्तैः विकल्पितास्तत्र यथान्धकारोऽनिश्चयहेतुरेवमत्रैषाऽनिश्चयहेतुभूता तस्यात्मानात्मानं कल्पयितुर्देवस्य क्रीडतः परमात्मनो माया। सा केत्याका-

ङ्क्षायां कार्यलक्षणेन तां परिचाययंस्तस्याः स्वरूपमाह–ययाऽयं मोहितः स्वयमिति । ययाऽयं जीवः मोहितो भवति तादृक्प्रकारकः स्वयं परमात्मैव मायेत्यर्थः। तथा च जीवमोहकं परमात्मनः स्वरूपं मायेति फलति। अत एवैकादशस्कन्धे 'तन्मायाफलरूपेण केवलं निर्विकल्पितम्। वाङ्मनोगोचरातीतं द्विधा समभवद्बृहदि'ति भगवतोक्तम् । तेनासतीति, सदसद्विलक्षणेति मायास्वरूपं वदन्तो निरस्ताः। कल्पकोऽपि मोहितकथनेनैवोक्तः। तेन मोहितमात्मस्वरूपं जीव इति फलति । स च प्रदेशो अंशो वा इत्याशङ्का तु 'अंशो नानाव्यपदेशादि'त्यादिसूत्रैस्तद्विषयवाक्यै'र्ममैवांशो जीवलोके जीवभूतः'। 'एकस्यैव ममांशस्य जीवस्ये' त्यादिस्मृतिभिर्ब्रह्मसूत्रभाष्य एव निरस्तेति नेह निरस्यते ॥ १८ ॥ १९ ॥

एवमनिश्चितेतिश्लोकयोर्दार्ष्टान्तिकांशः कल्पयन्तीति मन्त्रस्थमायापदस्यार्थश्च विवृतः। अतः परं निश्चितायामिति मन्त्रस्थं दार्ष्टान्तिकांशं विवृणोति–प्राण इत्यादिभिः सर्वदेत्यन्तैर्नवभिः श्लोकैः—

प्राण इति प्राणविदो भूतानीति च तद्विदः।
गुणा इति गुणविदस्तत्वानीति च तद्विदः ॥ १९ ॥
पादा इति पादविदो विषया इति तद्विदः।
लोका इति लोकविदो देवा इति च तद्विदः ॥ २० ॥

वेदा इति वेदविदो यज्ञा इति च तद्विदः ।
भोक्तेति च भोक्तृविदो भोज्यमिति च तद्विदः ॥२१॥
सूक्ष्म इति सूक्ष्मविदः स्थूल इति च तद्विदः ।
मूर्त इति मूर्तविदोऽमूर्त इति च तद्विदः ॥ २२ ॥
काल इति कालविदो दिश इति च तद्विदः ।
वादा इति वादविदो भुवनानीति तद्विदः ॥ २३ ॥
मन इति मनोविदो बुद्धिरिति च तद्विदः ।
चित्तमिति चित्तविदो धर्माधर्मौ च तद्विदः ॥ २४ ॥
पञ्चविंशत इत्येके षड्विंश इति चापरे ।
एकत्रिंशक इत्याहुरनन्त इति चापरे ॥ २६ ॥
लोकाल्लोकविदः प्राहुराश्रमा इति तद्विदः ।
स्त्रीपुंनपुंसकं लैङ्गा परापरमथापरे ॥ २७ ॥
सृष्टिरिति सृष्टिविदो लय इति च तद्विदः ।
स्थितिरिति स्थितिविदः सर्वे चेह तु सर्वदा ॥ २८ ॥

तेन सर्वात्मको यः परमात्मेति सिद्धान्तः फलिष्यति । आत्मानं प्राणा इति वदन्तीति प्राणविदः । तेन एकदेशं आत्मत्वेन विदित्वा प्राणा एवात्मस्वरूपमित्याहुरित्यग्रिमेण सम्बन्धः । अर्थात् स्वशिष्येभ्यः । एवमग्रेऽपि ज्ञेयम् । भूतानि आकाशादीनि पञ्च । गुणाः सत्वादयः, सत्यादयो वा । तत्त्वानि पुरुषादीनि पञ्चविंशतिः । पादाः अकारोकारमकारनादाद्याः प्रणवादिविद्यासु प्रसिद्धाः । विषयाः शब्दादयः पञ्च । भोक्ता जीवः ।

एवमन्यदपि बोध्यम् । एवं दिङ्मात्रेणोक्त्वा कल्पितत्ववारणाय सर्वस्यात्मरूपतामाह—सर्वं चेह तु सर्वदेति । इह आत्मनि सर्वं पूर्वोक्तम् । चकारादनुक्तमपि यत्तदपि । सर्वदा सर्वकालं न तु कदाचित् । तथा चात्रोक्तस्य सर्वस्याद्यन्तरहितत्वादात्मरूपत्वे निश्चिते कल्पितप्राणादिविकल्पनिवृत्तौ सर्वमात्मेत्येवाद्वैतं भवतीत्यर्थः ॥ २०।२१।२२।२३।२४।२५।२६।२७।२८।

एवं नवभिर्दार्ष्टान्तिकांशो विवृतः । अतः परं एकैकांशविदः पूर्णज्ञानाभावेन मोहस्यापि सत्वात् कैवल्यतदभावयोरशक्यवचनात् किं फलमेकैकांशज्ञानं च तेषां कथमित्याकाङ्क्षायां प्रसङ्गात् फलं तज्ज्ञानप्रकारं चाऽऽह, द्वाभ्यां यमिति श्लोकाभ्यां—

यं भावं दर्शयेद् यस्य तं भावं स तु पश्यति ।
तं चावति स भूत्वाऽसौ तद्ग्रहः समुपैति तम् ॥ २९ ॥
एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः ।
एवं यो वेद तत्त्वेन कल्पयेत् सोऽविशङ्कितः ॥ ३० ॥

तथा च तस्य तस्य तावत्तावज्ज्ञाने परमात्मेच्छैव नियामिकेत्यर्थः । फलमाह—तमिति । यः यं भावं पश्यति तं तद्भावद्रष्टारमपि । चोऽप्यर्थे । अज्ञानशबलज्ञानमपीत्यर्थः । स भूत्वा तज्ज्ञानदार्ढ्याय तद्द्रष्टृभावरूपः आविर्भूय अवति सर्वविघ्नादिभ्यो रक्षति । इदमवान्तरफलम् । परमं तस्याह, असौ दृष्टान्तः । तद्ग्रहः

तदाश्रयः। तद्गृहस्तदेकनिष्ठो वा तत्तद्भावात्मकमात्मानं समुपैति, प्राप्नोति, तस्मिल्लीनस्तदात्मको भवतीत्यर्थः। अथवा तं स्वदृष्टं भावं प्राणादिरूपं अवति स्वान्तः रक्षति सदानुसन्धत्ते। ततस्तस्य फलमाह—स भूत्वेति। 'देवो भूत्वा देवानप्येति' इतिवत्तदात्मको भूत्वा तदाश्रयस्तं प्राप्नोतीति पूर्ववत्। अवान्तरफलस्यावनस्य प्रयोजनमाह—एतैरिति। एतैः एकैकांशवेत्तृभिः एषः परमात्मा अपृथग्भावैरभिन्नसत्ताकैः प्राणादिभिः पृथगेव इतरभिन्न एव इति लक्षितः। एकांशत्वादन्यांशस्याभिन्नत्वं मिथ्यात्वं चोक्त्वा तद्भिन्नतया ज्ञापितः। तस्य प्रयोजनमेवं उक्तरीत्या इतरभिन्नतया यः शिष्यस्तत्वेनात्मत्वेन वेद जानाति सः अविशङ्कितः शङ्कारहितः सन् कल्पयेत् स्वस्वगुरूक्तं श्रुतिसिद्धं मतं समर्थयेत्। तथा च तत्तच्छिष्यैस्तन्मार्गप्रवर्तनार्थं तद्बोधनस्यावनमित्यर्थः। द्वितीयपक्षे तु सदानुध्यानस्यानुषङ्गिकं फलमनेनोच्यते। अर्थस्तु पूर्वोक्त एव ॥ २९ ॥ ३० ॥

एवं प्रासङ्गिकमुक्त्वा तेनाद्वैतं दृढीकृत्य भेदवादिनिन्दनाय तदभिमतस्य जगतो यादृशत्वं वेदान्तेष्वभिमतं तदाह—

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ ३१ ॥

स्वप्नमाये इति । स्वप्नो निद्राहेतुकोऽन्तःकरणवृत्तिविशेषः । माया इन्द्रजालादौ प्रसिद्धा । गन्धर्वनगरमुत्पाद्यते तेषु दृश्यमानमतिसुन्दरपुरम् । तानि दृष्टानि यथा येन प्रकारेण भवन्ति, इदं भेदवाद्यभिमतं दृष्टं लौकिकदृष्टिविषयभूतं विश्वं तथा तेन प्रकारेणास्तीति विशेषः । यथा तानि तथा वा इदं दृष्टम् । अर्थात् सुन्दरतया भासमानमपि मिथ्याभूतं वेदान्तेषु विचक्षणैर्वेदान्तनिपुणैर्दृष्टं, वेदान्तेषु वा विविधैः स्वप्नमायानिभत्वादिकथनैर्दृष्टं, न तात्पर्याभिज्ञैरवगतम् ॥ ३१ ॥

तत्र हेतुमाह तम इत्यादि द्वाभ्याम्—

तमःस्वप्ननिभं दृष्टं वर्षबुद्बुदसंनिभम् ।
नाशप्रायं सुखाद्धीनं नाशोत्तरमभावगम् ॥ ३२ ॥

दृष्टं दर्शनगोचरीभूतं जगत् तमःस्वप्ननिभम् । तमो यथा सवितर्युदिते ऽनायासेनापैति, स्वप्नो वा निद्राद्यपाये । तथेदं भिन्नं जगद्दर्शनगोचरमपि तत्त्वज्ञाननाश्यं अन्तः । पूर्वोक्तैः संवृतत्वादिहेतुभिः । तस्य मिथ्यात्वमित्यर्थः । किञ्च, वर्षे वर्षणे ये बुद्बुदाः तत्सन्निभं तत्तुल्यम् । तुल्यतामेवाऽऽह—नाशप्रायेत्यादिना । तथा च पूर्वोक्तेनाद्यन्तवत्त्वेनापि तस्य मिथ्यात्वमित्यर्थः । इदं व्यासस्मृतिवाक्यम् ।

मिथ्यासाधर्म्यान्मिथ्यात्वमुक्त्वा सत्यवैधर्म्यादप्याह–

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्नवै मुक्त इत्येषा परमार्थता ॥ ३३ ॥

न निरोध इति । निरोधोत्पत्ती जडधर्मौ, शेषा जीवधर्माः, ते परमात्मनि न सन्ति । सर्वरूपत्वेन सर्वधर्मरहितत्वात् । स एव च परमार्थभूतः । तद्वैधर्म्यादप्यस्य भिन्नस्य जगतो न सत्यत्वमित्यर्थः ॥ ३३ ॥

भेदवादिनो विनिन्द्य पूर्णज्ञानरहितयोर्मिथ्यावाद्येकैकांशाभेदवादिनो मतमनुवदन् सर्वाद्वैतं प्रशंसति–

भावैरसद्भिरेवायमद्वयेन च कल्पितः ।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा ॥ ३४ ॥

भावैरिति । अयमात्मा असद्भिर्मिथ्याभूतैर्भावैः प्राणादिभिः साधितं यदद्वैतं तेनापि कल्पितः, अर्थान्मिथ्यावादिभिः । भावा अप्यद्वयेन ह्यन्यथा भवन्ति तथा कल्पिताः । अर्थादेकैकांशवद्भिः उभयथाप्यद्वैतस्यैवोभयवादिसंमतत्वादद्वयता शिवा । वादिविप्रतिपत्त्यसंभवादसंदिग्धा समीचीनेत्यर्थः । एतेनापि साङ्ख्यनैय्यायिकादिमतापेक्षया अनयोरुत्तमत्वं सूचितम् । अत्रोत्तरार्द्धेकल्पितपदकथनाद्द्वितीयैकदेशिनः पूर्वापेक्षया किञ्चिदुत्तमत्वं सूचितम् । समुपैति तमितिवदस्य फलाकथनाच्च ॥ ३४ ॥

---

१ त्तरात्कल्पि इति कदाचित् स्यात् ।

एवमेकदेशिनोर्मतमुक्त्वा सखण्डाखण्डभेदेन द्विविधमद्वैतज्ञानं वेवेक्ति द्वाभ्यां नात्मभावेनेति—

नात्मभावेन नानेदं न स्वेनापि कथञ्चन ।
न पृथङ् नापृथक्किञ्चिदिति तत्त्वविदो विदुः ॥३५॥
वीतरागभयक्रोधैर्मुनिभिर्वेदपारगैः ।
निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः ॥ ३६ ॥

तस्य भावस्तत्त्वं सर्वत्रात्मभावः, तद्विदन्तीति तत्त्वविदः। सर्वत्वं पुरस्कृत्य तत्र ब्रह्मत्वविदः, सखण्डब्रह्मज्ञाना इतियावत्। ते इदं जगत् नाना न किन्तु ब्रह्माभिन्नमिति विदुः। ततोऽप्यनेकसाधनैर्मुनिभिर्मननशीलैरयं निर्विकल्पः केवलब्रह्मस्फूर्तौ सर्वांशास्फुरणात् प्रपञ्चोपशमोऽद्वयो द्रष्टव्यः इति द्विविधमद्वैतज्ञानमत्रोक्तम्॥३५॥३६॥

एवं विविच्याखण्डब्रह्मज्ञानाधिकारभूतसखण्डानुभवार्थं साधनमुपदिशति द्वाभ्यां तस्मादिति—

तस्मादेवं विदित्वैनमद्वैते योजयेत् स्मृतिम् ।
अद्वैतं समनुप्राप्य जडवल्लोकमाचरेत् ॥ ३७ ॥
निस्तुतिर्निर्नमस्कारो निःस्वधाकार एव च ।
चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् ॥ ३८ ॥

यस्मादीदृशमेवात्मज्ञानं नान्यथा तस्मात्। एवं उक्तद्विविधप्रकारेण, एनमात्मानं विदित्वा श्रुतितोऽवगत्य स्मृतिं मायिकप्रपञ्चभिन्नप्रपञ्चादिबोधिकां पुराणादिरूपामद्वैते योजयेत्। अद्वैततात्पर्यतया वैराग्याद्यर्थत्वेन

लापयेत् । न तु तदनुसारेण श्रुत्यर्थमन्यथा कुर्यादित्यर्थः । शेषं स्पष्टम् ॥

एवमुक्तसाधनकरणे फलमाह—

तावमाध्यात्मिकं दृष्ट्वा तावं दृष्ट्वा तु बाह्यतः ।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥ ३८ ॥

इति गौडपादीयकारिकासु वैतथ्याख्यं द्वितीयं प्रकरणम् ॥

तत्वमिति । आवृत्तिरुपसंहारार्था, द्विविधज्ञानदार्ढ्यार्था वेति सर्वं व्याख्यातमनवद्यम् । अत्रेदं सिद्ध्यति । सृष्टिर्द्विविधा भगवद्रूपा मायिकी च । तत्राद्या त्रिधा । भोक्तृसृष्टिः बाह्यभोगसृष्टिराध्यात्मिकभोग्यसृष्टिश्चेति । सा त्रिविधापि सत्या, नित्यत्वात् । द्वितीया बाह्याभ्यन्तरभेदेन द्विधा । तत्राभ्यन्तरा अव्यवस्थिता । बाह्या व्यवस्थिता । सा द्विधापि पुनर्द्विधा जाग्रत्स्वप्नभेदेन । तत्रापि जाग्रति या बाह्या सा इन्द्रियाद्बहिर्लोकान्तरेव जायते । एवं सर्वापि मायिकी मिथ्या, आद्यन्तत्वात् । प्रथमायां कारणमपि भगवान् । द्वितीयस्याः करणं माया । तत्र मोहो द्वारम् । कर्ता तु भगवानेव क्रीडन् । एवं सति दुःखस्यापि मोहजत्वात्तन्निवृत्तये मोहो निव-

---

१—नेमः कारिका उपनिषत् किन्तु शंकराचार्यगुरुणा निर्मिताः श्लोकाः । अतस्तन्मतानुयायिनामेव प्रामाणिकत्वमावहन्ति नान्येषामिति मन्मतिः ।

र्तनीयः । स चाज्ञानजन्मेत्यज्ञानं निवर्तनीयम् । तत्र साधनं ब्रह्माद्वयज्ञानम् । तच्चतुर्धा । सर्वं मायिकं ब्रह्मैव निराकारं सत्यमित्येकदेशिमतम् । प्राणादिष्वेकैकरूपो भगवानितरन्मिथ्येत्यपरैकदेशिनां मतम् । भेदवाद-सिद्धं तु सर्वं मायिककोटौ निविशति । सर्वत्वज्ञानपूर्वकं सर्वत्र ब्रह्मस्फूर्तिः सखण्डब्रह्माद्वैतज्ञानं तत्सिद्धान्ते-धिकाररूपम् । अखण्डाद्वैतज्ञानं साक्षात्काररूपं फलम् । तत्राधिकारज्ञानसिद्ध्यर्थं जडचर्याद्युपदिशति । इदं चावश्यते (?) । आद्यन्तवत्त्वमसत्कार्यवादे दूषणं नतु साङ्ख्यवादे । तेन तदपि ज्ञानसाधनम् । साधनान्तराणां स्मार्तानामुपासनानां च सत्त्वात् किमिति जडचर्या-द्युपदेश इति एतद्द्वयमतमद्वैताख्ये विचारयिष्ये ।

इति श्रीमद्वल्लभनन्दनचरणधनेन पुरुषोत्तमेन कृतं
वैतथ्यप्रकरणविवरणम् ॥

समाप्ता.